1902
COOCH BEHAR.

नागानन्दम्।

नाम नाटकम्।

महाकवि श्रीहर्षदेवविरचितम्।

बि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्येण

विरचितया व्याख्यया समुद्भासितम्।

द्वितीय संस्करणम्।



कलिकातानगर्य्यां

सरस्वतीयन्त्रे

मुद्रितम्।

१८८६।

প্রকাশক—শ্রীজীবানন্দ বিদ্যাসাগর
২ নং রমানাথ মজুমদারের ষ্ট্রীট্।

প্রিণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৮ নং আমহর্ষ্ট ষ্ট্রীট্। কলিকাতা

22 FEB 1902

नागानन्दम् (क)।

प्रथमोऽङ्कः (ख)।

नान्दी (ग)

ज्ञानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणम्
पश्यानङ्गरातुरं जनमिमं व्रातापि नो रक्षसि।

वाग्देवीं हृदये ध्यात्वा बालानां बोधहेतवे।
नागानन्दस्य विष्टतिर्जीमूतानन्देन तन्यते॥

(क) नागानन्दमिति। नागानां पन्नगानाम् आनन्दो यस्मिन् तत् अथवा नागान् पन्नगान् आनन्दयतीति नागानन्दं पचाद्यच्। दन्त्यादयः।

(ख) अङ्क इति। अङ्कयति क्षणयति व्यञ्जयतीति यावत् रसभावादीनिति अङ्कः। तत्सम्बन्धसूक्तं दर्पणे। यथा। प्रख्यातेतिवृत्तो रसभावसमुज्ज्वलः। भवेदङ्कोऽल्पार्थः क्षुद्रत्रोटकसंयुतः। विष्कम्भाबालनैकार्थैः किञ्चित्संधन्यविन्दुकैः। युक्तो न बहुभिः काव्यैर्बीजसंसूतिमाश्रयः। नानाविधानसंयुक्तो नातिप्रचुरपद्यवान्। आश्वासकानां काव्यांशविरोधाद्विनिर्मितः। नानेकदिननिर्वर्त्यः क्षणयोजितः। आमुखनायकः पात्रैर्युक्तश्चतुरैस्तथा। दूराङ्गानं वधोयुद्धं राज्यदेशादिविप्लवः। विवाहो भोजनं यागोत्सर्गौ सत्यूरतं तथा। दन्तक्षेत्यं नखक्षेत्यमन्यद् व्रीडाकरञ्च यत्। मद्यनाधरपानादि नगराद्यवरोधनम्। स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः। देवीपरिजनादीनाममात्यवणिजामपि। प्रख्यातचरितैर्युक्तो भावरसोद्भवैः। अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्यते इति।

मिथ्याकारचिकोऽपि निर्घृणतरश्चेतः स कोऽन्यःपुमान्
ईर्ष्यं मारवधूभिरित्यभिहितो बुद्धोजिनः पातु वः ॥१॥(घ)

अपिच,

कामेनाकृष्य चापं दृतपटुपटहाघोषिभिर्मारवीरै-
र्भ्रूभङ्गोत्कम्पजृम्भाक्षितचलितहृया दिव्यनारीजनेन ।
सिद्धैः प्रह्वीकृताङ्गैः पुलकितवपुषा विस्मयाद् वासवेन
ध्यायन् बोधेरबाधो न चलित धृति वः पातु दृष्टो मुनीन्द्रः
॥२॥ (ङ)

(ग) नान्दीति । नन्दयति हृष्टानिति नान्दी विघ्नविनाशार्थं नटैः क्रियमाणो मङ्गलाचरण विशेषः । तदुक्तं दर्पणे । आशीर्वचन-संयुक्ता नित्यं यस्मात् प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति कथ्यते इति ।

(घ) ध्यानव्याजमिति । ध्यानं समाधिरेव व्याजः कपटं तत् उपेत्य प्राप्य आश्रित्येत्यर्थः कां कालामिति शेषः चिन्तयसि भावयसि, त्यजं चक्षुः उन्मील्य विकास्य अनङ्गधराहरं कामवाधविद्वेषं दृशं जनं मामिति भावः यद्य व्यवलोकय, नाता रक्तकोऽपि रक्तचलनयो-रधीति यावत् नो रक्तयसि ? मिथ्या काल्पिकः इत्यबोधोऽपि, ते काल्पिकत्वं मिथ्येत्यर्थः क्षणः अन्यः निर्घृणतरः अतिनिर्दयः पुमान् कः ? कोऽपि नास्तीत्यर्थः । मारवधूभिः कामवधूभिः कामि-नीभिरिति भावः । ईर्ष्यं सासूयं यथा तथा इति इत्यम् अभिहितः उक्तः तिरस्कृत इति यावत् बुद्धः ज्ञानी बुद्धमतावलम्बी वा जिनः बुद्धात् रक्षत्वानिति भावः पातु रक्षतु । पातु क्षविक्रोडितं इत्थं ख्यो-ग्रैर्वहि नः खलो यततनाः पातु क्षविक्रोडितमिति तद्वचनात् ।

(ङ) कामेनेति । कामेन चापं कार्मुकम् आकृष्य प्रकारान्तेन भावः, मारवीरैः कामानुचरैः चन्दनचन्द्रनरोचनादिभिरिति भावः वीरैः कामिजनप्रकारार्थं वसन्तमेवीरैरिति भावः । कृताः लाक्षिता

आमुखे—

अलङ्कारः॥ चक्रमतिविस्तरेण। पञ्चाहविन्ध्योर्वी सर्वंसहानमाह्य नानादिग्देशावतीर्ण राजश्रीहर्षदेवस्य पादपद्मोपजीविना(च) राजसमूहेनोक्तः। यत्तदद्यत्वन्नामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालङ्कृतं(छ) विद्याधरचक्रवर्त्तिप्रतिबद्धं (ज) नागानन्दं नाम नाटकं श्रुतसञ्चारिभिः श्रोत्रपरम्परया श्रुतं न च प्रयोगतो(झ) दृष्टम्। तत्तस्यैव राज्ञः सकलजनहृदयाह्लादिनो (ञ) बहुमानादेवात्र(ट)

पटवः सकलभाषाः पटहा वाद्यभेदा यैस्तथोक्ताः तैरुक्तः आघोषितः उद्घुष्टं घोषणीति ताडिमाः तैः खड्गिरिति भावः, दिग्नागरोजनेन सुराङ्गनावर्गेण भ्रूभङ्गेन सत्कलत्रेण जृम्भया स्त्रिया च चकिते चञ्चलतां गते दृष्टौ नयने यैस्य ताडयेन यशो, विद्वैः देवयोनिविशेषैः प्रह्वं नतम् उत्तमाङ्गं शिरो येषां तथोक्तैः अवनतमस्तकैरित्यर्थः प्रथमगिरिरिति यावत् तथा वाचयेन दृष्ट्वेव पुलकितवपुषा रोमाञ्चितशरीरेण न चकित इति विस्मयात् चमत्कारवृद्धा दृष्टः भावन् समाधौ निश्चलं बोधैः ज्ञानैः ज्ञानानिश्चयेना इत्यर्थः मुनीन्द्रो वः युष्मान् पातु रक्षतु। पार्श्वचक्रीडितं दृश्यम्।

(च) पादपद्मोपजीविना चरणारविन्दाश्रितेन।

(छ) अपूर्वेति। अपूर्वम् अद्भुतं यद् वस्तु इतिवृत्तं तस्य रचनया वर्णनेन अवद्भूतं शोभितम्।

(ज) विद्याधरेति। विद्याधराणां चक्रवर्त्तिना अधीश्वरेण प्रतिबद्धं युक्तं तत्कथावस्तुतमित्यर्थः।

(झ) प्रयोगतः अभिनयेन।

(ञ) सकलेति। सकलानां जनानां हृदयाह्लादिनः सकल जनोरञ्जकस्य।

(ट) बहुमानात् बहुमोरवात्।

चानुग्रहबुद्धया यथावत्प्रयोगेणाद्य त्वया नाटयितव्य-
मिति (ठ)। तथावदिदानीं नेपथ्यरचनां कृत्वा यथाभिल-
षितं सम्पादयामि। परिक्रम्यावलोक्य च। आवर्जितानि
(ड)च सकलसामाजिकमनांसि इति मे निश्चयः। यतः—

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च सिद्धराजचरितं नाट्ये च दक्षा वयम्।
यत्रैके कमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥२॥(ढ)

तथावदहं गृहं गत्वा गृहिणीमाहूय सङ्गीतकमनु-
तिष्ठामि। परिक्रम्य नेपथ्याभिमुखमवलोक्य। इदमसदृष्टं
यावत् प्रविशामि, प्रविश्य आर्ये! (ण) कृतस्तावत्।

प्रविश्य नटी। साक्षम्। (त) अज्ज! इयन्ति मन्दभाग्या।

(ठ) नाटयितव्यम् अभिनेतव्यम्।

(ड) आवर्जितानि वशीकृतानि गुणग्रहणमभिमुखीकृतानीति यावत्।

(ढ) श्रीहर्ष इति। श्रीहर्षः निपुणः विचक्षणः कविः काव्यरचयिता, एषा परिषदपि सभ्यसमूहो अपीत्यर्थः गुणग्राहिणी गुणग्रहणशीलिनी, लोके जगति सिद्धराजस्य चरितं हारि मनोहारि च, वयन्तु नाट्ये अभिनयव्यापारे दक्षाः निपुणाः, एकैकमपि गुणैकं वस्तु श्रीहर्षादिकमिति भावः एकं जगति वाञ्छितफलप्राप्तेः अभीष्टलाभस्य, पदं स्थानं हेतुरिति यावत् अयं भाग्योपचयात् भाग्योत्कर्षात् अयं सर्वः गुणानां गणः समूहः समुदितः सम्यक्त्वेन उदितः उपस्थितः किं पुनः वक्तव्य इति शेषः। आर्द्रा कविश्रीर्उद्धृतं इलम्।

(ण) आर्ये भाग्ये।

(त) भाग्य अयाग्यम्।

आणवेदु अज्जउत्तो को विओओ अहविही अदुत्तिओ (१) ।

सूत्र । णडीमवकोक्य । आर्ये ! नायाबन्दे नाटयितव्ये किमिदमकारणमेव रुद्यते ।

णटी । अज्ज ! कधं ण रोदिस्सं । यदो दाव तादो अज्जाए सह अविरभावं आणिअ अदूरजादणिव्वेदो कुडुम्बभारुव्वहणजोग्गो दाणीं (अ) तुमंति णिअए वितक्किअ तवोवणं गदो (२) ।

सूत्र (इ) । अनिर्वेदम् (ब) अये ! अहं मां परित्यज्य तपोवनं यातो पितरो तत् किमिदानीं युज्यते, विचिन्त्य—अथवा अहमहं गुरुचरण-परिचर्या-सुखं परित्यज्य गढे तिष्ठामि कुतः ।

---

(१) आर्ये ! दयमसि मन्दभाग्या । आज्ञापयतु आर्यपुत्रः को नियोगोऽनुष्ठीयतामिति ।

(२) आर्ये ! कथं न रोदिष्यामि । यतस्तावत् तात आर्यया सह स्वविरभावं ज्ञात्वा अदूरजातनिर्वेदः कुटुम्बभारोद्वहनयोग्य इदानीं त्वमिति क्षुद्रये वितर्क्य तपोवनं गतः ।

(अ) तातः श्वशुर इति यावत् । आर्यया श्रद्धा । स्वविरभावं वार्द्धकम् । अदूरेति । अदूरम् अचिरं यथा तथा जातो निर्वेदः संसारं प्रति वीतरागत्वं यस्य तथोक्तः । कुटुम्बेति कुटुम्बानां पोष्यवर्गाणां भारोद्वहने योगक्षेमविधाने समर्थः यः स इत्यर्थः ।

(इ) सूत्रधारः प्रधानपटविशेषः ।

(ब) अनिर्वेदं वैराग्यम् ।

पितोर्विधातुं शुश्रूषां त्वत्तो लब्धं क्रमागतम् ।
वनं यास्यतमस्यैव यथा जीमूतवाहनः ॥४॥ (न)

इति निष्क्रान्तौ ।

प्रस्तावना (प) ।

ततः प्रविशति नायको विदूषकश्च ।

नायकः । सखिर्वेदम् वयस्य शृणोषि ।

रागस्यास्पदमित्येवैमि नहि मे ध्वंसीति न प्रत्ययः
कृत्याकृत्यविचारचातु विमुखं कोवा न वेत्ति क्षितौ ।
एवं निन्द्यमपीदमीप्सितफलप्राप्त्यै भवेद्यौवनं
भक्त्या यादि यदीत्यमेव पितरौ शुश्रूषमाणस्य मे ॥५॥(फ)

(न) पितोरिति । अहमद्यैव क्रमागतं पैतृकम् ऐश्वर्यं सम्पदमित्यर्थः त्वत्तो पितोः जननीजनकयोः शुश्रूषां सेवां विधातुं कर्तुं जीमूतवाहनो यथा वनं यामि गच्छामि ।

(प) प्रस्तावना । प्रस्ताव्यते क्रियते प्रस्तूयतमनयेति तथोक्ता प्रभूतात् स्तौतेर्ण्यन्तात् भावे अनट्प्रत्ययः । तल्लक्षणसङ्गः दर्पणे । नटो विदूषको वापि पारिपार्श्विक एव वा सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्यैश्च प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सेति ।

(फ) रागस्येति । यौवनं रागस्य विषयाभिलाषस्य आस्पदं स्थानम् इति एवैमि जानामि, ध्वंसि विनश्वरम् इति मे प्रत्ययः नहि इति न, अपितु अवश्यभङ्गुरमेवेति जानामीत्यर्थः । को वा जनः क्षितौ पृथिव्यां कृत्याकृत्यविचारचातु कर्त्तव्याकर्त्तव्यप्रकारेषु विमुखम् अज्ञमिति यावत् न वेत्ति न जानाति सर्व एव वेत्तीत्यर्थः एवं निन्द्यमपि इदं यौवनं यदि इत्थम् अनेन प्रकारेण पितरौ भक्त्या शुश्रूषमाणस्य सेवमानस्य मे मम यादि गच्छति अतिक्रामतीति

विदू। भवितव्यम् भो वयस्स! णं णिव्विण्णो एव्व तुमं एत्तिअं कालं एत्ताणं जीवन्तमुआणं कदे इमं ईदिसं वणवासदुक्खं अणुहवन्तो। ता पसीद दाणिं पि दाव गुरुचरणसुस्सूसाणिव्वत्ताहो (ब) णिव्वत्तिअ इच्छापरिभोगरमणिअं रज्जसुखं अणुहवीअदु (१)।

नायकः। वयस्य! न सम्यगभिहितं त्वया। कुतः।

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किन्तथा
यत् संवाहयतः सुखं तु चरणौ तातस्य किं राजके।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो-
रावासः खलु राज्यमुज्झितगुरोस्तत्रास्ति कश्चिन्नृपः ॥६॥ (भ)

---

(१) भो वयस्य! नन्वेवं निर्विण्ण एव त्वमेतावन्तं कालं एतयोर्जीवन्मृतयोः कृते इदमीदृशं वनवासदुःखमनुभवन्। तत् प्रसीद इदानीमपि तावत् गुरुचरणशुश्रूषानिर्वृत्या निवृत्त्य इच्छापरिभोगरमणीयं राज्यसुखं अनुभूयताम्।

यावत् तदा वाञ्छितफलप्राप्तौ अभीष्टलाभाय भवेत् मन्दमपि वस्तु शुभकर्मणि आप्रियमाणं शुभफलदं भवतीति भावः। यादृच्छविक्रीडितं इत्तम्।

(ब) निर्विण्णः निश्चिन्तः। जीवन्मृतयोः जीवतोरपि मृतप्राययोरित्यर्थः पितोरिति शेषः जीर्णत्वादिति भावः। गुरुचरणेति गुर्वोः पित्रोश्चरणशुश्रूषायां यः निर्वृत्तः आत्मप्रीतिलयः आदर इति यावत्। तस्मात्।

(भ) तिष्ठन्निति। पितुः पुरः अग्रतः भुवि भूतले तिष्ठन् यथा भाति राजते जन इति शेषः सिंहासने तिष्ठन् तथा किं नैव भातीत्यर्थः तातस्य चरणौ संवाहयतः सेवमानस्य यत् सुखं भवतीति शेषः,

विदूषकः । आत्मगतम् । अहो ! से गुरुजणसुस्सूसाणुराओ । किंचिअ । ओट्ठ ता एदंपि दाव अण्णं किअ दाव भणिस्सं । प्रकाशं भो वअस्स चत्तु अहं रज्जसोक्खं जेव केवलं सहिस्सिअ एवं भणामि । अण्णंपि दे करणीअं अत्थिज्जेव (१) ।

नायकः । सखिगतम् वयस्य ! ननु कृतमेव यत्करणीयम् ।

पद्य—

न्याये वर्त्मनि योजिताः प्रणतयः सन्तः सुखं स्थापिता
नीतो बन्धुजनस्तथात्मसमतां राज्ये च रक्षा कृता ।
दत्तो दत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने
किं कर्त्तव्यमतःपरं कथय वा यत्ते स्थितं चेतसि ॥७॥(अ)

---

(१) अहो ! तस्य गुरुजनशुश्रूषानुरागः । भवतु तदेतदपि तावत् अन्यदिव तावत् भणिष्यामि । भो वयस्य ! न केवलं राज्यसुखमेव केवलसहिष्य एवं भणामि अन्यदपि ते करणीयमस्त्येव ।

राजके राज्यकामे इत्यर्थः तथा किम् ? नैव तादृशं सुखमित्यर्थः । गुरोः पितुः शुश्रूषाज्ञिते भक्तिभावविशेषे भुक्ते वा स्थितः सन्तोषः भवतीति शेषः भुवनत्रये भुक्ते तथा किम् ? त्रिभुवनभोगे तादृशी धृतिर्नास्तीत्यर्थः । उक्तञ्च: त्यक्तः गुरुणेति तथोक्तस्य गुरुत्यागिन इत्यर्थः राज्यम् आवाभ्यां चतु, क्लेश एवेत्यर्थः तव राज्ये कांक्षत् गुप्तः सुखमिति यावत् खलि ? वाक्यालंकारार्थः आकूतमिति बोध्यम् । आर्द्रचर्विक्रीडितं हस्तम् ।

(अ) न्याये इति । प्रणतयः अमात्यादयः न्याये न्यायादनपेते वर्त्मनि योजिताः नियोजिता इत्यर्थः अमेति सर्वत्र सम्बध्यते । सन्तः बान्धवः सुखं स्थापिताः, बन्धुजनः आत्मसमतां आत्मत्वतां नीतः आत्मानः कृत इत्यर्थः राज्ये च रक्षा कृता राज्यरक्षणमपि कृत-

विदू। भो वयस्स! अल्पलसाकसिओ मदकुदंबओ दे पडिवक्खो, तक्किं च समासस्सिदे दे पधानामच्चसमधिट्ठिदंपि च तुए विणा रज्जं सुत्थिरं (य) ति पडिभादि (१)।

नायकः। धिङ्मूर्ख! मत्कृतो राज्यं स्थरिष्यतीति ब्रूषे।

विदू। अधइं (२)।

नायकः। यद्येवं तत् किं न स्यात्। ननु स्वशरीरात् प्रभृति सर्वं परार्थमेव मया परिपाल्यते यत्तु स्वयं न दीयते तत्तातानुरोधात् तत् किमनेनाबलुना चिन्तितेन वरं ततश्चैवानुष्ठिता आत्मापितस्वामि तातेन। यथा वयस्य! जीमूतवाहन! बहुदिवसपरिभोगेण स्वीकृतसमित्कुशकुसुममुपभुक्तमूलफलकन्दनीवारप्रायमिदं स्थानं वर्त्तते। तदितो मलयपर्वतं गत्वा किञ्चित्तस्मिन् निवासयोग्य-

---

(१) भो वयस्य! अल्पलसाकसिको मत्कृतकस्ते प्रतिपक्षः। तत्किंच समाश्वस्थिते ते प्रधानामात्यसमधिष्ठितमपि न त्वया विना राज्यं सुस्थिरमिति प्रतिभाति।

(२) अथ किम्।

मित्यर्थः दत्त मनोरथफलादपि अधिकं फलं येन तथाभूतः कल्पद्रुमः अपि अर्थिने याचकाय दत्तः। अतःपरं किं कर्त्तव्यं ते तव मनसि यत्स्थितं तत्कथय। गाढ्यविक्लोक्तिं दृष्ट्वा।

(य) अल्पलसाकसिकः अतिदुर्बलः। प्रतिपक्षः शत्रुः। समाश्वस्थिते सन्तिष्ठते। प्रधानामात्यसमधिष्ठितं सुरक्षमन्त्रिभिरक्षितम्। सुस्थिरं निर्विघ्नेन स्थितम्।

(२) यद्येवं यदि एवं मत्कृतेन मे राज्यं भूतं तत् तदा किं न

मार्गमपहं निरूपयेति (र)। तदेहि मलयपर्वतमेव गच्छावः।

विदू। जं भवं आणवेदि। एदु भवं (१)। इदुभौ परिक्रामतः।

विदू। अयमेवोऽवलोक्य भो वयस्स! पेक्ख पेक्ख एसो खलु सरसघनचन्दनवनोद्भवपरिमिलनलग्नवहलपरिमलो विमलतटनिपतनजलकणराजमानझरोच्छलितसिशिरशीकराशारवाही पवनसङ्गमोत्कण्ठितप्रियाकरग्रहो विय मग्गपरिस्समं अवणयन्तो रोमञ्चेदि (ल) पियकपक्खं मलयमारुदो (२)।

---

(१) यदु भवानाज्ञापयति। एतु भवान्।

(२) भो वयस्य! प्रेक्षस्व प्रेक्षस्व एष खलु सरसघनचन्दनवनोद्भवपरिमिलनलग्नबहलपरिमलो विमलतटनिपतनजलकणराजमानझरोच्छलितशिशिरशीकराशारवाही पवनसङ्गमोत्कण्ठितप्रियाकरग्रहः इव मार्गपरिश्रममपनयन् रोमाञ्चयति प्रियवयस्यं मलयमारुतः।

स्यात् सर्वमेवाभीष्टं सकलं स्यादिति भावः। अनु यतः। न दोषते राज्ञामिति शेषः अवस्तुना असारेण। तातादेव पितुरादेश एव अनुष्ठिता प्रतिपादिता वरं अनाक् प्रियमर्थः अपरस्य असारस्य वस्तुनश्चिन्तनात् पितुरादेशपालनचिन्तनं श्रेयश्चिन्त्यमित्यर्थः। बहुदिवसपरिभोगेन दीर्घकालव्यवहारेण। ओसन्नेति ओसन्नानि स्तोकानि सञ्चितकुसुमसुरभीणि यस्मात् तथोक्तम्। उपभुञ्जन्ति उपभुञ्जानि चन्दनूषकलक्षणीवारादि प्रायेण बाहुल्येन यस्य तथाभूतम्। विन्ध्यस्य पक्षः।

(ल) सरसेति। सरसं स्निग्धं यत् घनचन्दनवनं तस्य

वायवः । विश्रब्धविचरणम् । भद्रे ! आस्तां इयं वयं मलय-पर्वतम् । वसन्तावतरोत्सवम् । भद्रे ! रामणीयकमस्य । तथाहि

माद्यद्दिग्गजगण्डभित्तिकषणैर्भग्नस्रवद्बन्धनः
क्लान्तत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः ।
पादाक्रान्तकरक्रमौक्तिकचितः सिद्धाङ्गनानां गतै-
र्दृष्टोऽयं मलयाचलः किमपि मे चेतःकुतूहत्सुकम् ॥८॥(ब)

तदेष्वावस्य वासयोग्यं किञ्चिदाश्रमपदं विक-
ल्पयावः ।

उत्सङ्गस्य क्रोडस्य परिमिलनेन सम्पर्केण जन्यः सञ्जातः बहुलः प्रभूतः परिमलः गन्धः तथाभूतः । विमलेति विमले निर्मले तटे निपतनेन जर्जरायमाणो चूर्णतामापद्यमानो यः निर्झरः पर्वतोपरिनिष्टात् प्रवाहरिसङ्घातः तस्मात् उच्छलितः वसन्तात् विधिप्रो यः शिशिरः शीतलः शीकराणां जलकणानाम् आसारः धारासम्पातः तद्वाहो तद्वानिलार्थः । प्रथमेति प्रथमो यः सङ्गमः तस्मिन् उत्कण्ठितायाः उत्सुकायाः प्रियायाः कण्ठपक्ष इव कण्ठाश्लेष इव । आपनयन् कुरन् । रोमाञ्चयति जातरोमाञ्चं करोति उल्लासोद्यादिति भावः ।

(ब) आद्यादिति । आद्यतां मदस्रावित्वां दिग्गजानां गण्डा एव भित्तयः तासां क्षणैर्घर्षणैः भग्नाः अतएव स्रवन्तः क्षरद्वाः बन्धनाः चन्दनतरवः यस्य तथाभूतः जलनिधेः समुद्रस्य वीचिभिः ऊर्मिभिः आस्फालितः आहतः अतएव क्लान्तन्ति भ्लनन्ति कन्दरा दर्य एव गह्वराणि विवानि यस्य तथोक्तः तथा सिद्धाङ्गनानां सिद्धाङ्गना-देवयोनिविशेषनारीणां गतैः गमनैः पादाक्रान्तकेन रक्ता मौक्तिकचिताः मुक्तासमस्तरा यत्र तथाविधः अयं मलयाचलः दृष्टः सन् मे मम चेतः किमपि अनिर्वचनीयं यथा तथा उत्सुकं करोति कौतुकं जनयति । आर्दूलविक्रीडितं वृत्तम् ।

विदू० । एवं करेमि । चयतः क्षिप्त्वा । एतु भवं ।
आरोहणं (१) । नाटयतः ।

मायवः । दक्षिणाक्षिस्पन्दनं सूचयन् । सखे !

दक्षिणं स्पन्दते चक्षुः फलाकाङ्क्षा न मे क्वचित् ।
नच मिथ्या मुनिवचः कथयिष्यति किं त्विदम् ॥ ९ ॥ (ग)

विदू० । भो वयस्स ! अवस्समासन्नं (घ) दे पियं निवेदेदि (२) ।

मायवः । एवं नाम (ङ) यथाह भवान् ।

विदू० । विलोक्य । भो वयस्स पेक्ख पेक्ख । एदं कु सविसेसचक्खुसिणिद्धपाडवविसोहिअं सुरहिइविसन्धगन्ध-

---

(१) एवं करोमि । एतु भवान् ।

(२) भो वयस्य ! अवश्यमासन्नं ते प्रियं निवेदयति ।

(ग) दक्षिणमिति । दक्षिणं चक्षुः स्पन्दते स्फुरति, मे मम क्वचित् फलस्य दक्षिणाक्षिस्पन्दनजन्यस्य शुभस्य इत्यर्थः आकाङ्क्षा अभिलाषः न अस्तीति शेषः । मुनिवचः मुनेः शकुनशास्त्रकारस्य वचः दक्षिणाक्षिस्पन्दनेन शुभफलसूचकवचनमित्यर्थः न च मिथ्या अवश्यम्भावीत्यर्थः, अतः इदं दक्षिणाक्षिस्पन्दनं किं तु कथयिष्यति प्रकटयिष्यतीति यावत् । पथ्यायाश्च इत्थं बुद्धोत्पत्तयतो येन पथ्यायाश्च प्रकीर्त्तितमिति सङ्गच्छते ।

(घ) आसन्नं समीपवर्त्ति ।

(ङ) एवं नामेति । एवमु आसन्नप्रियं नाम यस्यावनार्थो यत्नायते इत्यर्थः सुनिमित्तसूचनादिति भावः ।

सिणुद्धामधूमविग्गमं अणुब्भिग्गसुहविसयसावअगब्भं (ङ)
तवोवणं विअ लक्खीअदि (१)।

नायकः। सम्यगुपलक्षितम्। तपोवनमेवैतत्। कुतः।

वासोऽर्थं दयया व नातिपृथवः क्षत्ताङ्कुरणां त्वचो
मन्मालक्ष्यजरत्कमण्डलुरतः स्वच्छं पयो नैर्झरम्।
दृश्यन्ते त्रुटितोञ्छिताश्च वटुभिर्मौञ्जाः क्वचिन्मेखला
नित्याकर्णतया शुकेन च पदं सान्द्रामिदम्श्रूयते ॥१०॥(च)

---

(१) भो वयस्य! प्रेक्षस्व प्रेक्षस्व। एतत् खलु सविशेषघनस्निग्ध-पादपविक्षोभितं सुरभिकुसुमगन्धगर्भितोद्दामधूमनिर्गमम् अनुद्दिग्नसुख-निषण्णशावकलक्ष्यं तपोवनमिव लक्ष्यते।

(च) सविशेषेति। सविशेषैरत्यन्तं घनैः स्निग्धैः पादपैः तरुभिः विक्षोभितं विशेषेणालङ्कृतं सुरभिभिः शोभनैः कुसुमगन्धैः गर्भे जातोऽस्य तादृशः उद्दामः उत्कटः धूमस्य निर्गमो यस्मात् तथाभूतं तथा अनुद्दिग्नाः अतएव सुखनिषण्णाः शावकशब्दाः मृगशावानिति शेषः यस्मिन् तथोक्तम्।

(छ) वासोऽर्थमिति। वासोऽर्थं परिधानार्थं तरूणां नाति-पृथवः नातिस्थूलाः त्वचः वल्कलानि दयया इव कृपावतयेव क्षत्ताः क्षिप्ताः, मन्मालक्ष्यः मत्सदृशः जरन् जीर्णतामापद्यमानः कमण्डलुः जलपात्रविशेषः यस्मिन् अतः स्वच्छं सुनिर्मलम् आवि-लत्वे तथा कमण्डलुदर्शनं न सम्भवतीति भावः नैर्झरं पयः निर्झरो-दकम्। क्वचित् प्रदेशे वटुभिः ब्रह्मचिबालकैः त्रुटिताश्छिन्ना अतएव उञ्छिताः त्यक्ताः मौञ्जाः मुञ्जतृणनिर्मिता मेखला काञ्चीदामानि दृश्यन्ते, तथा नित्याकर्णतया नित्यश्रवणेन हेतुना शुकेन पक्षिणाञ्च सामवेदानाम् इदं पदं गीयते च। आर्द्रत्वविक्षोभितं दृश्यम्।

ततोऽहि प्रविश्य अवलोकयतः । प्रवेशं नाटयतः ।

नायकः । सर्वतश्चं विलोक्य । अहो ! नु खलु मुदितमुनिजनप्रविचार्यमाणसन्दिग्धवेदवाक्यविस्तरस्य पठद्भिरुच्छिद्यमानार्द्रार्द्रैः समिधस्तापसकुमारिकापूर्ण्यमाणवालहरियालवालस्य प्रशान्तरमणीयता (क) तपोवनस्य ।

दृष्ट्वा—

मधुरमिव वदन्तः स्वागतं भृङ्गयष्टै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टिं किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥११॥ (ख)

(क) मुदितेति । मुदितैः हृष्टैः मुनिजनैः प्रकर्षेण विचार्यमाणो बीजाङ्कुरानो सन्दिग्धः सन्देहाक्रान्तो वेदवाक्यानां विस्तरो यत्र तादृशस्य पठद्भिः वटुभिः छिद्यमाना आर्द्रार्द्राः अतिसरसाः समिधः यज्ञकाष्ठानि यत्र तथाभूतस्य तथा तापसकुमारिकाभिः आपूर्ण्यमाणः जलैः सम्पूर्यमाणो यालवृक्षाणाम् आलवालः तलप्रदेशे जलदानार्थं वर्तुलाकारो वृतिविशेषो यत्र तथाभूतस्य । प्रशान्तस्य रमणीयस्य तस्य भावः स्निग्धमनोहरत्वमित्यर्थः ।

(ख) मधुरमिति । शाखिनोऽपि तरवोऽपि अतिथिसपर्यां अतिथिसेवां कथं शिक्षिताः तापसजनैरिति शेषः । तथाहि अमी शाखिनः भृङ्गाणां यष्टैः भ्रमरसमूहैः मधुरमिव स्वागतं वदन्तः सन्तः फलनम्रैः फलभरावनतैः शिरोभिः नतिमिव कुर्वते प्रणमन्तीव, तथा पुष्पवृष्टिं किरन्तः पुष्पाणि वर्षन्त इत्यर्थः मम अर्घ्यं ददत इव । उत्प्रेक्षालङ्कारः । तदुक्तं दर्पणे, भवेत् सम्भावनात्रेषा प्रकृतस्य परात्मनेति । शाखिनोऽत्तम्, ननमवयवयुतेर्यं शाखिनो भोगिलोकैरिति तल्लक्षणात् ।

तविवासबोग्गमिदं तपोवनम् मञ्चे मविअतोह वसु-
तामस्माकं निर्वृतिः (ग)।

विदू। भो वयस्स! किं क्खु एदे ईसिवलिअकन्धरा निच्चलमुहाव सरन्तदरदलिअदब्भकवला समुग्गामिदट्ठि-
एक्ककण्णा सुहणिमीलिदलोअणा आअण्णन्ता विअ (घ)
हरिणा लक्खीअन्ति। (१)

नायकः। कर्णं दत्वा। सखे! सम्यगुपलक्षितम्।

तथाहि—

स्थानप्राप्तावधानं प्रकटितसमतामन्द्रतारव्यवस्था-
निर्द्वादिग्या विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वरेण।
एते दन्तान्तरालस्खलितदलकवलच्छेदशब्दं नियम्य
व्यालिङ्गाङ्गाः कुरङ्गाः स्फुटललितपदङ्गीतमाकर्णयन्ति
॥ १२ ॥ (ङ)

(१) भो वयस्य! किं खल्वेते ईषद्वलितकन्धरा निश्चलसुखाम-रहरदलितदर्भकवलाः समुद्गमितदत्तैककर्णाः सुखनिमीलितलोचना आकर्णयन्त इव हरिणा लक्ष्यन्ते।

(ग) निर्वृतिः सन्तोषः।

(घ) ईषदिति। ईषत् किञ्चित् वलिताः साचीकृताः कन्धरा ग्रीवा यैः तथोक्ताः। निश्चलेति निश्चलेभ्यः स्थिरेभ्यः चर्वणादिव्यापार-रहितेभ्य इति भावः सुखेभ्यः अपसरन्तः स्खलन्तः दरदलिताः किञ्चित् खण्डिताः दर्भकवलाः कुशाङ्कुरग्रासा येषां तथाभूताः। समुद्गमि-तेति समुद्गमितः दत्तः अवस्थित इति यावत् एकः कर्णो यैः तादृशाः। तथा सुखेन निमीलिते लोचने यैः तथाविधाः। आकर्णयन्त इव शृण्वन्त इव किमपीति शेषः।

(ङ) स्थानेति। एते कुरङ्गाः हरिणाः व्यालिङ्गानि अङ्ग-

विदू। भो वयस्स! को उण एसो तवोवणं णाअदि। (१)

मादवः। यथैताः कोमलाङ्कुलितलाभिरभ्यमान स्फुटं क्वणन्ति तन्त्रास्तथा काकलिप्रधानकीयत इति तर्कयामि। अङ्गुल्यग्रेणाग्रतो निर्दिशन्। अस्मिन्नायत देवतामाराधयन्ती काचिद्दिव्या वीणामुपवीणयति। (च)

विदू। भो वयस्स! एहि मन्हेवि देवदाअदणं पेक्खम्ह। (२)

---

(१) भो वयस्य! कः पुनरेष तपोवनं नायति।

(२) भो वयस्य! एहि आवामपि देवतायतनं प्रेक्षावहे।

वक्रितानि अङ्कानि येषां तथोक्ताः विवक्षा इति भावः दलानां अन्तरालेषु अभ्यन्तरेषु स्थिता ये तन्त्रकवलाः तेषां छेदशब्दं चर्वणा नियम्य वक्ष्यमाणं प्रकटितः आविष्कृतः सततया सान्त्येन या मन्द्रतारं वक्त्रा मन्थीरोद्व्यवस्थानं तया निस्तोदिन्याः सुखरं ध्वनन्त्या विपञ्च्या वीणायाः तन्त्रीस्वरेण अधिरूढेनेव भ्रमरगुञ्जितेनेव मिश्रितं सत् तथा स्फुटानि सुव्यक्तानि क्वणितानि मनोहराणि यदाने सुष्ठु कलकूजितानि यस्य तादृशं गीतम् स्थाने यथायोग्ये इति भावः प्राप्त अयधानं यत्नात् तथा काकलीप्रधानमिति क्वणन्ति। स्वरान्तरस्य मध्यमादीनां लवेन लिप्तनियतियुता स्वरा कीर्तितेयमिति तं क्वणात्।

(च) कोमलेति। कोमलेन मृदुलेन अङ्कुलितलेन अभिरभ्यमान ताड्यमानाः। क्वणन्ति ध्वनन्ति। काकलीप्रधानमिति काकली स्फुट मधुराक्षुटः ध्वनः प्रधानं यत्र तत् यथा तथा काकली तु स्फुटे ध्वनौ तु मधुराक्षुटे दृत्यमरः। उपवीणयति वीणया स गायतीत्यर्थः।

नायकः। वयस्य! साधूक्तं खलु भवता। धन्याः खलु देवताः। उपसर्पन्तु तावत्। वयस्य! कदाचिद् दृष्टमनङ्गोऽयं जनो भवति। तदावां तमालगुल्मान्तरितौ पश्यन्ताववसरं प्रतिपालयावः (क)। तथा कृतम्।

ततः प्रविशति यथानिर्दिष्टा वीणां वादयन्ती मकरन्दवती चेटी च।

नायिका। गायति—

उत्फुल्लकमलकेसरपरागगौरद्युतेः। मम हि गौरि!।
अभिवाञ्छितं प्रसिध्यतु भगवति! युष्मत्प्रसादेन ॥१३॥ (ज)

नायकः। कथं दृष्टा। वयस्य! अहो! गीतमहो! (झ) वाद्यम्।

व्यक्तिव्यञ्जनधातुना दशविधेनाप्यत्र लक्ष्यामुना
विस्पष्टो द्रुतमध्यलम्बितपरिक्लिन्नस्त्रिधायं लयः।

(क) अनर्हः अयोग्यः। तमालेति तमालानां तटाख्यतरूणां गुल्मेन निचयेन विस्तारेणेत्यर्थः। अन्तरितौ व्याच्छादितौ गोपितौ इत्यर्थः। अवसरं समयं प्रतिपालयावः अपेक्षावहे।

(ज) उत्फुल्लेति। उत्फुल्लानां विकसितानां कमलानां केसरेषु किञ्जल्केषु यः परागः रजः तद्वत् गौरी द्युतिः कान्तिर्यस्याः तादृशि! कनकप्रभे इत्यर्थः भगवति गौरि! युष्मत्प्रसादेन भवदनुग्रहेण मम अभिवाञ्छितम् अभिलषितं हि निश्चितं प्रसिध्यतु सफलताम् एतु। आर्यावृत्तम्, यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये पञ्चदश चतुर्थके सार्या इति तल्लक्षणात्।

(झ) अहो गीतम् अहो आश्चर्यं आश्चर्यं गीतमित्यर्थः।

(ञ) व्यक्तिरिति। दशविधेन दशप्रकारेण अमुना श्रोत्रविधीक्षतेनेति भावः व्यञ्जन्ते स्वरा अनेनेति व्यञ्जनः, स चासौ धातुश्चेति तथोक्तेन स्वरव्यञ्जनसङ्घीतायत्तविधेयेनेत्यर्थः। व्यक्तिः स्वरप्रकाशनं

नोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि सम्पादिता
व्रातोद्यानुगताश्च वाद्यविधयः सम्यक् त्रयो दर्शिताः
॥ १४ ॥ (अ)

चेटी। सम्पन्नम्। भट्टिदारिए! चिरं खु वादयन्तीए कुदो वि परिस्समो भगहत्थाए (१)।

नायिका। साधिक्षेपम् (ट)। हञ्जे! कुदो मे देवीए पुरदो वीणं वादयन्तीए भगहत्थाए परिस्समो (२)।

चेटी। भट्टिदारिए! णं भणामि किं एदाए विज्जहत्थाए पुरदो वादएव। जा एत्तिअं कालं कण्णाजवदुक्करेहिं विभमोवासणेहिं आराधयन्तिए भत्तवि ण दे पसादं दंसेदि (३)।

---

(१) भर्तृदारिके चिरं खलु वादयन्त्याः कुतो ऽपि परिश्रमोऽपहस्तायाः।

(२) हञ्जे कुतो मे देव्याः पुरतो वीणां वादयन्त्या अपहस्तायाः परिश्रमः।

(३) भर्तृदारिके! नन्वहमपि विभेतव्या विज्ञहस्तायाः पुरतो

लब्धा अनुभूतार्थः। अयं द्रुतं गीतोच्चरितत्वं मध्यं गीतयोश्चातिमन्द्रोच्चरितत्वं विलम्बितं दीर्घोच्चरितत्वं तैः परिच्छिन्नः विशेषितः अतएव त्रिधा चतुष्प्रकारेण त्रिविधः त्रयः सङ्गीतस्य सङ्गीतिस्थानविशेषः विस्पष्टः सम्यक् प्रकटता गतः। नोपुच्छप्रमुखाः नोपुच्छप्रभृतयः तिस्रोऽपि यतयः विच्छेदाः क्रमेण यथाक्रमं सम्पादिताः प्रकाशिताः। त्रयः त्रिविधा इत्यर्थः व्रातोद्यं वीणा तदनुगता तच्छ्रुता वाद्यविधयः वाद्यव्यापारास्तु सम्यक् दर्शिताः प्रकटिताः। आर्यूढविक्रीडितं वृत्तम्।

(ट) साधिक्षेपं सतिरस्कारम्।

विदू। अण्णधा क्खु एसा किं ण पेक्खसु (१)।

भावव्यः। को दोषः। निर्दोषदर्शनाः कन्यका भवन्ति। किन्तु कदाचिदज्ञान् दृष्ट्वा बालभावसुलभात् साध्वसाच्च चिरमिह तिष्ठेत्। तदनेनैव तमालजालान्तरेण (ठ) पश्यावः।

विदू। एव्वं करेम्ह। उभौ पश्यतः (२)।

विदू। दिट्ठा सविअअम् भो वअस्स! पेक्ख पेक्ख। अहह अच्छरिअं! ण केवलं वीणाविण्णाणेणेव (ड) सुहं करेदि। जाव इमिणा वीणाविण्णाणाणुरूवेण रूवेणवि अच्छीणं सुहं उप्पादेदि। का उण एसा?। किं दाव देवी?। आहो णाअकण्णआ?। आहो विज्जाहरदारिआ?। आहो सिद्धकुलसम्भवेत्ति? (३)।

वादिनेन। या एतावन्तं कालं कन्यकालनदुष्करैर्नियमोपासनैराराधयन्त्या अद्यापि न ते प्रसादं दर्शयति।

(१) कन्यका खल्वेषा। किं न प्रेक्षावहे।

(२) एवं कुर्वः।

(३) भो वयस्य! प्रेक्षस्व प्रेक्षस्व। अहो आश्चर्यम्!। न केवलं वीणाविज्ञानेनैव सुखं करोति। यावत् अनेन वीणाविज्ञानानुरूपेण रूपेणापि चक्षुषः सुखमुत्पादयति। का पुनरेषा। किं तावत् देवी?। आहोस्वित् नागकन्यका?। आहोस्वित् विद्याधरदारिका?। आहोस्वित् सिद्धकुलसम्भवेति?।

(ठ) तमालजालान्तरेण तमालतरुगुल्मव्यवधानेन।

(ड) वीणाविज्ञानेनैव वीणायां विषये यज्ज्ञानेन सुनैपुण्येनेत्यर्थः।

चेटी। सदृशम्। भट्टिदारिए! जदि एवं। ता कीस सिविणयं इमं भणीयदि। यं हिअयट्ठिदो वरो देवीए दिण्णो (१)।

विदू। जुत्तं भो वयस्स! अवसरो क्खु एसो अप्पाणं देवीदंसणस्स। ता एहि उवसप्पम्ह (२)।

नायकः। न तावत् प्रविशामि।

विदू। अनिच्छन्नपि नायकसहितं बलादानय। उपजल्पसीति भोदीए। भोदि! मज्झकं खेव्व चदुरिआ भणादि। वरो एव्व सो देवीए दिण्णो (३)।

नायिका। सखाध्वनसुस्थितस्तो नायकसहितं हञ्चे! को ण क्खु एसो? (४)।

चेटी। नायकं निरूप्यापवार्य्य इमाए अणस्स सरिसाए आकिदीए एसो सो भअवदीए पसादीकिदोत्ति तक्केमि (५)।

मनोपरि भक्त्या। तद् विद्याधरचक्रवर्त्ती आत्मरक्षैव ते मानसिकफलं निर्वर्त्तयिष्यतीति।

(१) भर्त्तृदारिके यद्येवं तत् किमत्र एव भण्यते। नन्वु हृदयस्थितो वरो देव्या दत्तः।

(२) भो वयस्य! अवसरः खल्वेषोऽस्माकं देवीदर्शनाय। तदेहि उपसर्पावः।

(३) स्वस्ति भवत्यै। भवति! खल्वेव चतुरिका भणति। वर एव स देव्या दत्तः।

(४) हञ्चे! को नु खल्वेषः?

(५) अनया अनन्यसदृश्या आकृत्या एव स भगवत्या प्रसादीकृत इति तर्कयामि।

नायिका सस्पृहं सकम्पञ्च नायकमवलोकयति ।

नायकः । तनुरियं तरलायतलोचने !

श्वसितकम्पितपीनघनस्तनि ! ।

श्रममलं तपसैव गता पुनः

किमिति सम्भ्रमकारिणि ! खिद्यते ॥१६॥ (६)

नायिका । अपवार्य हञ्जे ! अदिसहसेण ण सक्कुणोमि एदस्स अहिमुहो ठादुं नायकं तिर्यक् सकम्पञ्च पश्यन्ती किञ्चित् पराङ्मुखी तिष्ठति (१) ।

बेटी । भट्टिदारिए ! किं एदं ? (२) ।

नायिका । हञ्जे ! ण सक्कुणोमि एदस्स आसणे चिट्ठिदुं । ता एहि अण्णदो गच्छञ्ज (३) उत्थातुमिच्छति ।

विदू । भो ! भाअदि क्खु एसा । मम पठिअविज्जं विअ मुहुत्तअं धारेमि (४) ।

(१) हञ्जे ! अतिसाध्वसेन न शक्नोमि एतस्याभिमुखी स्थातुम् ।

(२) भट्टदारिके ! किमेतत् ?

(३) हञ्जे ! न शक्नोमि एतस्यासने स्थातुम् । तदेहि अन्यतो गच्छावः ।

(४) भो ! बिभेति खल्वेषा । मम पठितविद्यामिव मुहूर्तं धारयामि ।

(६) तनुरिति । तरले चञ्चले आयते दीर्घे लोचने यस्याः तत् सम्बुद्धौ श्वसितेन निश्वासेन कम्पितौ पीनौ स्थूलौ घनौ निबिड़ौ स्तनौ यस्याः तत्सम्बोधने हे सम्भ्रमकारिणि ! महर्षनात् सम्भ्रान्ते इत्यर्थः इयं तनुः शरीरं तपसैव श्रमम् अत्यर्थं श्रमं गता, किमिति कथं पुनः खिद्यते ? द्रुतविलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति तल्लक्षणात् ।

नायकः। को दोषः?।

विदू। भोदि! किं एत्थ तुम्हाणं तवोवणे ईदिसे आआरो। जेण अदिही आअदो आआमेत्तेण वि ण सम्भावीअदि (१)।

बेटी। नाविकां दृष्ट्वा आत्मगतम्। अणुरज्जदि विअ एत्थ एदाए दिट्ठो। भोदु एव्वं दाव भणिस्सं। प्रकाशम्। भट्टिदारिए! जुत्तं भणादि बम्हणो। उइदो क्खु दे अदिहिअणसक्कारो। ता किं ईदिसे महाणुभावे पडिवत्तिमूढा (ध) चिट्ठसि?। अहवा चिट्ठ तुमं। अहं एव्व अधासुरूवं करइस्सं। नायकं निर्दिश्य। साअदं अल्लसु। आसणपरिग्गहेण अलङ्करेदु अज्जो इमं पदेसं (२)।

विदू। भो वअस्स! सोहणं एसा भणादि। उवविसिअ एत्थ मुहुत्तअं वीसमअ (३)।

---

(१) भवति! किमत्र युष्माकं तपोवने ईदृश आचारः। येनातिथिरागतो वाङ्मात्रेणापि न सम्भाव्यते।

(२) अनुरज्यत इवात्रैतस्मिन् दृष्टः। भवत्वेनं तावदु भणिष्यामि। भट्टदारिके! युक्तं भणति ब्राह्मणः। उचितः खलु ते अतिथिजनसत्कारः। तत् किमीदृशे महानुभावे प्रतिपत्तिमूढा तिष्ठसि? अथवा तिष्ठ त्वम् अहमेव यथानुरूपं करिष्यामि। आगतमात्रेण। आसनपरिग्रहेण अलङ्करोत्वार्य इमं प्रदेशम्।

(३) भो वयस्य! शोभनमेषा भणति। उपविश्यात्र मुहूर्तं विश्राम्यावः।

(ध) प्रतिपत्तिमूढा इतिकर्तव्यविमूढा।

नायकः। युक्तमाह भवान्। उभावुपविशतः।

नायिका। चेटीमुद्दिश्य अहं परिहासशीले! मा एवं करेहि। कदापि कोपि तापसो पेक्खदि। तदो मं अविणीदेत्ति (न) सम्भावइस्सदि (१)।

ततः प्रविशति तापसः।

तापसः। आम्रापितोऽस्मि कुलपतिना कौशिकेन (प)। यथा वत्स शाण्डिल्य! पितुराज्ञया सिंहयुवराजमिचावसुर्भविष्यद्विद्याधरचक्रवर्त्तिनं कुमारजीमूतवाहनम् इहैव मलये पर्वते क्वापि वर्त्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टमद्य गतः। तस्य प्रतीक्षमाणाया मलयवत्याः कदाचिन्मध्यन्दिनसवनवेलावधिरतिक्रामेत्। तदेनामाह्वयागच्छेति। तत् तपोवनगौरीगृहमेव गच्छामि। परिक्रम्य भूमिं निरूप्य सविस्मयम्। अये! कस्य पुनरियं पांशुले भूप्रदेशे प्रकाशचक्रचिह्ना पदपंक्तिः (फ)। अयतो जीमूतवाहनं निर्दिश्य।

---

(१) अयि परिहासशीले! मैवं कुरु। कदापि कोऽपि तापसः प्रेक्षते। ततो मामविनीतेति सम्भावयिष्यति।

(न) अविनीता दुराचारिणी।

(प) कुलपतिना ऋषिसङ्घस्य अग्रहारेण वेदाध्यापयिता महामुनिः कुलपतिरुच्यते तेन। कौशिकेन कुशिकनन्दनेन विश्वामित्रेणेत्यर्थः।

(फ) मध्यन्दिनेति। मध्यन्दिने मध्याह्ने यत् सवनं स्नानं तदेव विधिः व्यापारः तस्य वेलावधिः समयनिबन्धः। अतिक्रामेत् अतीयात्। पांशुले रजस्वले। प्रकाशं प्रकटं चक्रस्य चक्रवर्त्तिलक्षणस्य चिह्नं यस्यां तादृशी। पदपंक्तिः पदविन्यासः।

नूनमस्यैवेयं महापुरुषस्य । तथाहि —

उष्णीषः स्फुट एष मूर्द्धनि विभात्यूर्णेयमन्तर्भ्रुवो
चक्षुस्तामरसानुकारि हरिणा वक्षस्थलं सर्वते ।
चक्राङ्कश्च यथा पदद्वयमिदं मन्ये तथा कोऽप्ययं
नो विद्याधरचक्रवर्त्तिपदवीमप्राप्य विश्राम्यति ॥१०॥ (ब)

अथवा कृतं सन्देहेन । अयमेतेनैव जीमूतवाहनेन भवितव्यम् । मलयवतीं निरूप्य । अये ! इयमपि राजपुत्री । उभौ विलोक्य । चिरात् खलु युक्तकारी विधिः स्यात् । यदि युगलकमेतदन्योन्यानुरूपं घटयेत् (भ) । उपसृत्य नायकं निर्दिश्य । स्वस्ति भवते ।

नायकः भगवन् ! जीमूतवाहनोऽभिवादयते । उत्थातुमिच्छति

तापसः । अलमलं अभ्युत्थानेन (म) । ननु सर्वस्याभ्या-

(ब) उष्णीष इति । मूर्द्धनि एषः स्फुटः मसृणः उष्णीषः शिरोवेष्टनभूतः राजसुकुटविशेष इत्यर्थः विभाति विराजते, भ्रुवोः अन्तः मध्ये इयम् ऊर्णा रोमराजिरित्यर्थः, चक्षुः तामरसानुकारि रक्तोत्पलसदृशं वक्षस्थलं हरिणा मृगेन्द्रेण सर्वते मृगेन्द्रवत् विशालमिति भावः इदञ्च पदद्वयं यथा चक्राङ्कं चक्रचिह्नञ्च, तथा मन्ये सम्भावयामि कोऽपि अयं पुरुषः विद्याधरचक्रवर्त्तिपदवीं विद्याधराधीश्वरत्वम् अप्राप्य नो विश्राम्यति न तिष्ठतीत्यर्थः अवश्यमेवायं विद्याधर चक्रवर्त्ती भविष्यतीत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(भ) युक्तकारी योग्ययोजनकारीत्यर्थः । युगलकं मिथुनम् । घटयेत् सङ्गमयेत् ।

(म) अभ्युत्थानेन उत्थाय अभ्यर्थनादिकरणम् अभ्युत्थानं तेन ।

यतो गुरुरिति भवानेवास्माकं पूज्यः। तद् यथासुखं स्थीयतां।

नायिका। अज्ज! पणमामि (१)।

तापसः। नायिकां निर्दिश्य। वत्से! अनुरूपभर्तृगामिनी भूयाः। राजपुत्रि! त्वामाह कुलपतिः कौशिकः। यथा अतिक्रामति मध्यन्दिनसवनवेला। तत् त्वरितमागम्यतामिति।

अनसूयती। जं गुरु आणवेदि आत्मगतम्। एक्कत्तो गुरुवअणं अण्णदो दइअदंसणसुहंत्ति गमणागमणाधिरूढं (य) अज्जवि मं दोलएदि हिअअं (२)।

उत्थाय निश्वस्य सलज्जं सानुरागञ्च नायकं पश्यन्ती तापससहिता निष्क्रान्ता

नायकः। सोत्कण्ठं निश्वस्य, नायिकां पश्यन्

अनया जघनाभोगभरमन्थरयातया।
अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥२८॥(र)

---

(१) आर्य्ये! प्रणमामि।

(२) यद् गुरुरात्मानमादिशति। एकतो गुरुवचनमन्यतो दयितदर्शनसुखमिति गमनागमनाधिरूढमद्यापि मां दोलयति हृदयम्।

(य) गमनागमनाधिरूढं गमनम् अगमनञ्च अधिरूढं गन्तुकामगमनाकामञ्चेत्यर्थः।

(र) अनयेति। अनया जघनस्य आभोगभरेण विस्तारातिरेकेण मन्थरं मन्दं यातं गमनं यस्यास्तथाभूतया। अन्यतोऽपि अन्यत्र व्रजन्त्या गच्छन्त्या अपि मे मम हृदये पदं निहितं दत्तम्।

विदू। भो! दिट्ठं तुए पेक्खिदव्वं। ता दाणिं मज्झ-सूसूरकिरणसन्तावदिउणिदो विअ मे उदरग्गी धमधमा-अदि (ख)। ता एहि णिक्कमम्ह। जेण बम्हणो अदिही भविअ सुणिजणसआसादो लद्धेहिं कन्दमूलफलेहिं पि दाव पाणधारणं करेमि। (१)।

नायकः। कर्ण मयलोक्य। मध्यमध्यास्ते नभस्तलस्य भगवान् सहस्रदीधितिः। तथाहि—

तापात् तत्क्षणतप्तचन्दनरसौ पाणौ कपाली वहन्
संसक्तैर्निजकर्णतालपवनैः संवीज्यमाननः।
सम्प्लेष विशेषसिक्तहृदयो हस्तोज्झितैः शीकरैः
म्लायच्छल्लकटुःसहामिव दयां धत्ते गजानां पतिः॥१८॥ (ग)

इति निष्क्रान्ताः सर्वे।

इति प्रथमोऽङ्कः।

---

(१) भो! दृष्टं त्वया प्रेक्षितव्यम्। तदिदानीं मम सूर्य-किरणसन्तापद्विगुणित इव मे उदराग्निर्धमधमायते। तदेहि निष्क्रा-मावः। येन ब्राह्मणोऽतिथिभूत्वा सुनिजनसकाशात् लब्धैः कन्द-मूलफलैरपि तावत् प्राणधारणं करोमि।

(ख) प्रेक्षितव्यं द्रष्टव्यम्। मध्याह्नेति। मध्याह्ने सूर्यस्य किरणैः सन्तापात् द्विगुणित इव द्वैगुण्यं प्राप्त इव अतिवर्द्धित इवेत्यर्थः। धमधमायते ज्वलतीत्यर्थः।

(ग) तापादिति। एषः गजानां पतिः गजराजः तापात् हेतोः शैलस्नाभाद्येति भावः। तत्क्षणं तप्तः अर्हितः चन्दनस्य तरोः रसः निर्यासः यस्यां तादृशौ कृतएव पाणौ शुभौ कपोलौ गण्डौ वहन् संसक्तैः सन्ततैः निजौ कर्णौ एव तालौ तालवृन्ते इत्यर्थः तयोः

अथ द्वितीयोऽङ्कः ।

ततः प्रविशति चेटी ।

चेटी । आणत्तम्हि भट्टिदारिआए मलअवदीए अज्जा-
इच्छे ! मणोहरिए अज्ज चिराअदि मे भाअरो अज्जमित्ता-
वसू । ता गदुअ जाणेहि किं आगदो ण वेत्ति । परिक्रा-
मति । नेपथ्याभिमुखं दृष्ट्वा का उण एसा तुरिततुरिदं इदो
एव्व आअच्छदि । निरूप्य । कहं चदुरिआ ? (१) ।

ततः प्रविशति द्वितीया चेटी ।

द्वितीया । उपसृत्य । इला चदुरिए ! किं निमित्तं उण
मं परिहरिअ एव्वं तुरिदाए गच्छीअदि (२) ।

---

(१) आज्ञप्तास्मि भर्तृदारिकया मलयवत्या यथा हला मनो-
हारिके ! अद्य चिरयति मे भ्राता आर्यमित्रावसुः । तद् गत्वा
जानीहि किमागतो नवेति । का पुनरेषा त्वरितत्वरितमित एवा-
गच्छति । कथं चतुरिका ? ।

(२) हला चतुरिके ! किं निमित्तं पुनर्मां परिहृत्य एवं त्वरि-
तया गम्यते ।

पवनैः वायुभिः संवीज्यमानम् आनन्दं यस्य तथाभूतः तथा हृत्तेन
गण्डादण्डेन उज्झितैः क्षिप्तैः शीकरैः जलकणैः विशेषेण सिक्तं
हृदयं यस्यास्यं यस्य तादृशः वनं यस्यति ग्लायतां ग्लानिं गच्छतां
मल्लिकानां मजभज्यतरविशेषाणां दुःसहानिव सोढुमशक्यानिव दवां
यत्ते प्राप्नोति मल्लिका यथा गर्जैर्भज्यमाना नितरां दुर्दशां गच्छन्ति
गजा अपि ग्रीष्मोत्तापेन तथेति भावः । मालविकाक्रीडितं हसन्तु ।

द्वितीया। हला मणोहरिए! आणत्तम्हि भट्टिदारिआए मलअवदीए हत्थे चदुरिए! कुसुमावचअपरिस्समणीसहं मे सरीरं। सरदादवजणिदो विअ मे सन्दावो अधिअदरं बाधेदि। ता गच्छ तुमं बालकदलीपत्तपरिक्खित्ते चन्दणलदाघरए चन्दमणिसिलाअलं (क) सज्जीकरेहित्ति। अणुचिट्ठिअं अ मए जधा आणत्तं। जाव गदुअ भट्टिदारिआए णिवेदेमि (३)।

प्रथमा। जइ एव्वं ता लहुं गदुअ णिवेदेहि। जेण्ण से तक्खिगदाए उवसमदि सन्दावो (४)।

द्वितीया। विहस्यात्मगतम्। ण ईदिसो से सन्दावो। जो एव्वं उवसमिस्सदि। विचित्तरमणीअं चन्दणलदाघरअं पेक्खन्तीए अधिअदरो सन्दावो हविस्सदित्ति तक्केमि।

---

(३) हला मनोहरिके! आज्ञप्तास्मि भर्तृदारिकया मलयवत्या। हस्ते चतुरिके! कुसुमावचयपरिश्रमनिःसहं मे शरीरम्। शरदातपजनित इव मे सन्तापोऽधिकतरं बाधते। तद् गच्छ त्वं बालकदलीपत्रपरिक्षिप्ते चन्दनलतागृहे चन्द्रमणिशिलातलं सज्जीकुर्विति। अनुष्ठितञ्च मया यथाज्ञप्तम्। यावद् गत्वा भर्तृदारिकायै निवेदयामि।

(४) यद्येवं तद्धि गत्वा निवेदय। येनासौ तत्क्षण एवोपशाम्यति सन्तापः।

(क) कुसुमेति। कुसुमानाम् अवचये चयने यः परिश्रमः तेन निःसहम् अशक्तं क्लान्तमित्यर्थः। बालकदलीति बालैः नवैः शरदैरित्यर्थः कदलीपत्रैः परिक्षिप्ते आवृते। चन्द्रमणिशिलातलं चन्द्रकान्तमणिमयपट्टमित्यर्थः।

प्रकाशम्। ता गच्छ तुमं। अहम्मि सल्लीकिदं मणिसिलातलं भट्टिदारिआए णिवेदेमि (५)।

इति निष्क्रान्ते।

ततः प्रविशति सोत्कण्ठा मलयवती चेटी च।

मलयवती। निःश्वस्यात्मगतम्। हिअय! तधा णाम तस्सिं जणे जं लज्जाए मन्थरं मुहं कदुअ दाणिं तस्सिं पत्तधा गदोसित्ति अहो। दे अप्पम्भरित्तणं (ख) प्रकाशम्। हञ्जे चदुरिए! आदिसेहि मे भअवदीए आअदणं (६)।

चेटी। आत्मगतम्। चन्दणलदाघरं पत्थिदा भणादि भअवदिए आअदणं। प्रकाशम्। चन्दणलदाघरअं भट्टिदारिआ पत्थिदा (७)।

नायिका। सलज्जम्। हञ्जे! सुट्ठु सुमराविदं। ता पहि तस्सिं एव्व गच्छह्म (८)।

---

(५) नेदृशस्यास्याः सन्तापः। य एवमुपगूढमिच्छति। विचित्ररमणीयं चन्दनलताभटङ्कं प्रेक्षमाणाया अधिकतरः सन्तापो भविष्यतीति तर्कयामि। तद्गच्छ त्वम् अहमपि सल्लीकृतं मणिशिलातलमिति गत्वा भर्तृदारिकायै निवेदयामि।

(६) हृदय! तथा नाम तस्मिन् जने यत् लज्जया मन्थरं मुखं कृत्वेदानीं तत्रात्मना गतोऽसीति अहो! ते आत्मम्भरित्वम्। हञ्जे चतुरिके! आदिश मह्यं भगवत्या आयतनम्।

(७) चन्दनलताभटङ्कं प्रस्थिता भणति भगवत्या आयतनम्। चन्दनलताभटङ्कं भर्तृदारिका प्रस्थिता।

(८) हञ्जे! सुष्ठु स्मारितम्। तदेहि तत्रैव गच्छावः।

(ख) मन्थरं जडम् अवागित्यर्थः। आत्मम्भरित्वं स्वार्थपरत्वम्।

चेटी। एदु एदु भट्टिदारिआ। (९)

नायिका अग्रतो गच्छति।

चेटी। पृष्ठतो इदा सोऽहं मलयवतम्। अहो! से सुण्णहिअअत्तणं। कहं तं एव्व देवीभवणं पविट्ठा। अज्जाअम् भट्टिदारिए! णं इदो चन्दणलदाघरअं ता इदो इदो एहि (१०)।

नायिका सविलक्षं (ग) तथा करोति।

चेटी। इदं चन्दणलदाघरअं। ता पविसिअ चन्दमणिसिलाअले उपविसिअ समस्ससदु भट्टिदारिआ (११) चन्दनोपविशतः।

नायिका। निःश्वस्य आत्मगतम्। अम्मअं कुसुमाउह! जेण तुमं रूअसीहाए णिज्जिदोसि। तस्स तुए ण किंपि किदं। मम उण अणवरद्धाएवि अवलेत्ति करिअ पहरन्तो ण लज्जेसि आत्मानं निर्वर्ण्य भर्तृदारिकावस्थां नाटयन्ती। आकाशम्। हञ्जे! कीस उण घणपल्लवणिरुद्धसूरकिरणं (घ) तं एव्व

---

(९) एतु एतु भर्तृदारिका।

(१०) अहो तस्याः शून्यहृदयत्वम्। कथं तत्रैव देवीभवनं प्रविष्टा। भर्तृदारिके! नलिनचन्दनलतागृहम्। तदित इत एहि।

(११) इदं चन्दनलतागृहम्। तत् प्रविश्य चन्द्रमणिशिलातले उपविश्य समाश्वसितु भर्तृदारिका।

(ग) सविलक्षं सलज्जितम्।

(घ) घनपल्लवैरिति। घनैः निबिडैः पल्लवैः निरुद्धा निवारिताः सूर्यस्य किरणा यस्मात् तथोक्तम्।

चन्दणवदाधरणं च मे अज्जाए सन्दावदुक्खं अवणेहि (१२)।

चेटी। जाणामि अहं एत्थ सन्दावस्स कारणं। किं उण असम्भाविणी भट्टिदारिआ च तं पडिवज्जिस्सदि त्ति (ङ)। (१३)

नायिका। आत्मगतम्। सकिदा विअ अहं एदाए। अहावि पुच्छिस्सं प्रकाशम्। हञ्जे! किं तं जं णं पडिवज्जिस्सदि। ता कहेहि दाव। किं तं कारणं? (१४)।

चेटी। एसो दे हिअअट्ठिदो वरो (१५)।

नायिका। हृदयं संस्पृश्योत्थाय हिमानि मदानि गता क्वेदं क्वेदं सो? (१६)।

---

(१२) भगवन् कुसुमायुध! येन त्वं रूपगोभया निर्जितोऽसि। तत्र त्वया न किमपि कृतम्। मम पुनरनपराधाया अपि अवलेति कृत्वा प्रहर्तुं न लज्जसे। हञ्जे! किं पुनर्धनपतुषवनिदहनसूर्य किरणं तदेव चन्दनलताभ्यङ्गं न मे अद्यापि सन्तापं क्षमयति।

(१३) जानाम्यहमत्र सन्तापस्य कारणम्। किं पुनरसम्भाविनी भर्तृदारिका न तत् प्रतिपत्स्यते इति।

(१४) सकितेवास्मीत्यया। तथापि पृच्छामि। हञ्जे! किं तत् यत् प्रतिपद्यते। तत् कथय तावत्। किं तत् कारणम्?

(१५) एष ते हृदयस्थितो वरः।

(१६) कुत्र कुत्र सः?।

(ङ) सन्तापस्य कारणं जीमूतवाहनमिति भावः। किं पुनः किन्तु असम्भाविनी जीमूतवाहनो मे भर्ता भविष्यतीति असम्भवं सम्भावयेत्यर्थः। तत् महाभिप्रेतम्। प्रतिपत्स्यते स्वीकरिष्यति।

चेटी। उत्थाय सचकितम्। भट्टिदारिए! को को? (१७)।

नायिका। सलज्जमधोमुखी तिष्ठति।

चेटी। भट्टिदारिए! एदाए वल्लुकामा। एसो दे हिअअट्ठिदो वरो एव्व देवीए दिण्णो सिविणए। पच्छदो क्खणं एव्व पविसुक्कुसुमवाणो विअ (च) मअरद्धओ भट्टिदारिआए दिट्ठो। सो दे इमस्स सन्तावस्स कारणं जेण एदं सहावसीदलम्मि चन्दणलदाघरअं ण दे सन्दावदुक्खं अवणेदि (१८)।

नायिका। चदुरिआए लच्छिदम्हि। सच्चं हञ्जे! चदुरिआ क्खु तुमं। किं दे अवरं पच्छाइअदि। ता कहिस्सं (१९)।

चेटी। भट्टिदारिए! दाणिं एव्व कहिदं। किं बहुणा पलविदेण। अलं सम्भमेण (छ)। मा सन्तप्प। जइ अहं

---

(१७) भट्टदारिके! स कः?

(१८) भट्टदारिके! एतस्मिन् वल्लुकाना। एष ते हृदयस्थितो वर एव देव्या दत्तः स्वप्ने। पश्चादपि क्षणमेव प्रविसुक्कुसुमबाण इव मकरध्वजो भट्टदारिकया दृष्टः। स ते अस्य सन्तापस्य कारणम्। येनैतत् स्वभावशीतलमपि चन्दनलतागृहं न ते सन्तापदुःखमपनयति।

(१९) चतुरिकया लक्षितास्मि। सत्यं हञ्जे! चतुरिका खलु त्वम्। किं तेऽपरं प्रच्छाद्यते। तत् कथयिष्यामि।

(च) पश्चादपि स्वप्नदर्शनानन्तरमपीत्यर्थः। प्रविसुक्क इति प्रविसुक्कः प्रक्षिप्तः कुसुमबाणः येन तादृश इव।

(छ) सम्भ्रमेण शङ्कया।

चतुरिआ तदा सोवि भट्टिदारिअं अवेक्खन्तो ण मुहुत्तअं पि अहिरमिस्सदि (ज)। ता एदम्मि मए लक्खिदं (२०)।

नायिका। सत्यम्। हञ्जे! कुदो अम्हाणं एत्तिओ भाग्गधेअं (२१)।

चेटी। भट्टिदारिए! मा एव्वं भण। किं मधुसूदणो विअ वच्छत्थलेण लच्छिं अणुव्वहन्तो णिव्वुदो भोदि (२२)।

नायिका। किं सुअणो पिअं वज्जिअ अण्णं भणिदुं जाणेदि। सहि! अदोवि मे सन्तावो अधिअदरं बाधेदि। जं सो महाणुभावो वाआमेत्तेण वि मए ण सम्भाविदो सोवि अकिदपडिवत्ती अदक्खिणेत्ति (झ) मं सम्भावइस्सदि (२३) इति रोदिति।

---

(२०) भर्तृदारिके! इदानीमेव कथितम्। किं बहुना प्रलपितेन अलं सम्भ्रमेण मा मन्यस्व। यद्यहं चतुरिका तदा सोऽपि भर्तृदारिकाम् अपेक्षमाणो न सुचिरमभिरंस्यते। तदिदमपि मया लक्षितम्।

(२१) हञ्जे! कुतोऽस्माकमेतावद्भाग्यधेयम्?

(२२) भर्तृदारिके! मैवं भण। किं मधुसूदन इव वक्षःस्थलेन लक्ष्मीमनुहरन् निर्वृतो भवति।

(२३) किं सुजनः प्रियं वर्जयित्वा अन्यत् भणितुं जानाति। सखि! अतोऽपि मे सन्तापोऽधिकतरं बाधते। यत् स महानुभावो वाङ्मात्रेणापि मया न सम्भावितः। सोऽप्यकृतप्रतिपत्तिरदक्षिणेति सम्भावयिष्यति।

(ज) अभिरंस्यते न सुचिरं भविष्यतीत्यर्थः।

(झ) अकृतप्रतिपत्तिः अकृतसत्कारः। अदक्षिणा अनुदारा अविनीतेत्यर्थः।

चेटी। भट्टिदारिए! मा रोद। अहवा कहं ण रोहिस्सदि। अहिओ से हिअअस्स सन्तावो अधिअदरं बाधेदि। ताकिं दाणीं एत्थ करइस्सं। ता जाव चन्दणलदापल्लवरसं से हिअए दाइस्सं। उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य हृदये ददाति। भट्टिदारिए! णं भणामि मा रोद। अअं खु ईदिसो चन्दणरसो इमेहिं अणवरपडन्तेहिं बाहविन्दूहिं उण्हीकिदो ण दे हिअअस्स एदं सन्तावं अवणेदि (२४)। कदलीपत्रमादाय वीजयति।

नायिका। कृच्छ्रेण निवारयति। सखि! मा वीजेहि। उण्हीकदु एसो कदलीदलमारुदो (२५)।

चेटी। भट्टिदारिए! मा इमस्स दोसं कहेहि। तुमं चिअ चन्द पल्लवसंसग्गसीदलं इमं णीसासेहिं पवाचिअ (अ) कमलीदलमारुदं उण्हं कुणसि (२६)।

---

(२४) भर्तृदारिके! मा रुदिहि। अथवा कथं न रोदिष्यति। अधिकोऽस्या हृदयस्य सन्तापोऽधिकतरं बाधते। तद् किमिदानीमत्र करिष्ये। तद् यावत् चन्दनलतापल्लवरसमस्या हृदये दास्ये। भर्तृदारिके! किमु भणामि मा रोदिहि। अयं खल्वीदृशश्चन्दनरस एभिरनवरतपतद्भिर्बाष्पबिन्दुभिरुष्णीकृतो न ते हृदयस्य एतं सन्तापमपनयति।

(२५) सखि! मा वीजय। उष्णः खल्वेष कदलीदलमारुतः।

(२६) भर्तृदारिके! मा अस्य दोषं कथय। त्वं चितचन्दनपल्लवसंसर्गशीतलमेनं निःश्वासैः प्रपञ्चय कदलीदलमारुतमेनमुष्णं करोषि।

(अ) चिरेति। चिरस्य यावितस्य चन्दनपल्लवस्य संसर्गेण शीतलं कदलीदलमारुतं कदलीपत्रवातं निःश्वासैः प्रपञ्चय संवर्धय।

नायिका । साक्षम् । सखि ! अत्थि कोवि इमस्स दुक्खस्स उवसमोवाओ (२७) ।

वेटी । भट्टिदारिए ! अत्थि जदि सो एत्थ आगच्छदि (२८) ।

सर्वः प्रविशति नायको विदूषकश्च ।

नायकः ।

व्याप्तत्वेव सितासितेक्षणरुचा तानाश्रमे शाखिनः
कुर्वंल्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।
यद्दृष्टोऽस्मि तया मुनेरपि पुरस्ते नैवमभ्याहते
पुष्पेषो ! भवता सुखेव किमिति त्रियन्त एते शराः ॥ (२०)(ट)

विदू । भो वयस्स ! कहिं कयु दे गदं तं धीरत्तणं ? (२९)

नायकः । वयस्य ! ननु सुधीर एवास्मि, कुतः—

---

(२७) सखि ! अस्ति कोऽपि अस्य सन्तापस्योपशमोपायः ।

(२८) भर्तृदारिके ! अस्ति यदि सोऽत्रागच्छति ।

(२९) भो वयस्य ! कुत्र खलु ते गतं तत् धीरत्वम् ?

(ट) व्याप्तत्वेति । हे पुष्पेषो ! कुसुमशर ! मुनेरपि पुरः अग्रतः भवता कान्तया सितञ्च असितं नीलञ्च यत् ईक्षणं नेत्रं तच्च रुचा कान्त्या आश्रमे तान् शाखिनः वृक्षान् विटपेषु शाखासु अवसक्ताः संलग्नाः विलसन्तः स्फुरन्तः कृष्णाजिनानां कृष्णसारचर्मणां ओघाः सङ्घाता वेषां तथाविधानिव कुर्वंल्या एतया व्याप्तत्व पराक्षत्व तृप्तमिति शेषः दृष्टोऽस्मि यत् तेन पराक्षत्व दर्शनेन एव एवम् एतत् अभ्याहते ताडिते कटाक्षबाणप्रहृते इति भावः मयीति शेषः भवता सुखेव अर्थनेव किमिति कथम् एते शराः त्रियन्ते पात्यन्ते ? प्रहृते प्रहारो न युक्त इति भावः । यादृच्छविक्रीडितं वृत्तम् ।

नीता: किं न निशा: शशाङ्कधवला: नाघ्रातमिन्दीवरम्
किं नोन्मीलितमालती सुरभय: सोढा: प्रदोषानिला: ।
झङ्कार: कमलाकरे मधुलिहां किं वा श्रुता न श्रुतौ
निर्व्याजं विधुरेष्वधीर इति मां येनाभिधत्ते भवान् ॥२१॥(ठ)

विचिन्त्य । अथवा मृषा नाभिहितं, वयस्याचेय ! नन्वधीर एवास्मि—

स्त्रीहृदयेन न सोढा: क्षिप्ता: कुसुमेषवोऽप्यनङ्गेन ।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम् ॥२२॥ (ड)

विदू । आत्मगतम् । एव्वमधीरत्तणं पडिवज्जन्तेण आव-

(ठ) नीता इति । शशाङ्कधवला: चन्द्रकिरणोज्ज्वला निशा: रजन्य: किं न नीता: नातिवाहिता: ? अतिवाहिता एवेत्यर्थ: मयेति सर्वत्र योज्यम् । इन्दीवरं नीलोत्पलं न आघ्रातम् ? अपितु आघ्रातमेवेत्यर्थ: । उन्मीलिता विकसिता या मालत्य: ताभि: सुरभय: सुगन्धा: प्रदोषानिला: निशावायव: किं न सोढा: अपितु सोढा एवेत्यर्थ: । कमलाकरे सरसि मधुलिहां भ्रमराणां झङ्कार: ध्वनि-विशेष: किं वा न श्रुत: । अपितु श्रुत एवेत्यर्थ: यत एवं भवान् मां विधुरेषु कातरेषु अधीरेष्वित्यर्थ: मध्ये अधीर इति अधीरतम इत्यर्थ: निर्व्याजं निष्कपटं निश्चितमित्यर्थ: अभिधत्ते कथयति । एतावति धीरत्वेऽपि मम अधीरत्वकथनमयुक्तमिति भाव: । शार्दूलविक्रीडितं वृत्तम् ।

(ड) स्त्रीहृदयेनेति । मयेत्यध्याहार्यम् । स्त्रीहृदयेन कान्तागत-मनसा मया अनङ्गेन क्षिप्ता: कुसुमेषव: पुष्पमया: शरा अपि न सोढा: येन अद्यैव तव पुर: अग्रत: स: असोढपुष्पशर: अहं धीर: अक्षमिति शेष: इति कथं वदामि ? त्वत्समीपे मम धीरत्वप्रकटन-मयुक्तमिति भाव: । आर्याछन्दस् ।

क्खिदो महाणो अणेण छिअअस्स आवेगो, ता जाव कहिं एव्व एदं अवक्खिवामि, (ठ) प्रकाशम्। भो वअस्स! कीस उण अज्ज तुमं तुहुं जेव्व गुरुअणं सुस्सूसिअ इह आगदो? (३०)॥

नायकः। वयस्य! स्थाने प्रश्नः, कस्य वान्यस्यैतत् कथनीयम्, यदा खलु स्वप्ने जानामि—सैव प्रियतमा। अवलोक्य निर्दिश्य। अत्र चन्दनलतागृहे चन्द्रकान्तमणि शिलायामुपविष्टा प्रणयकुपिता किमपि मानुपालभमानेव (ड) रुदती मया दृष्टा, तदिच्छामि स्वप्नानुभूतदयितासमागमरम्ये अस्मिंश्चन्दनलतागृहे दिवसशेषं समतिवाहयितुम्, तदेहि गच्छावः। परिक्रामतः।

चेटी। कर्णं दत्त्वा सभयभ्रमम्। भट्टिदारिए! पदसद्दो विअ (३१)।

नायिका। सभयभ्रमलालसं पश्यन्ती। हञ्जे! मा ईदिसं आआरं पेक्खिअ कोवि मे छिअअं तुलइस्सदि (त) ता

---

(३०) एवमधीरत्वं प्रतिपाद्यमानेन आपन्नो महाननेन दूरवस्थानेनः। तत् यावत् कथमेव एनम् अपनयामि, भो वयस्य! कथं पुनरद्य त्वं खल्वेव गुरुजनं शुश्रूषित्वा दृष्टागतः?

(३१) भर्तृदारिके! पदशब्द इव।

(ठ) अपनयामि कथिनं विषये एनं व्याधिप्रहृदयं करोमि येनास्य विप्रलम्भेन कथमपि क्रियत्कालं विनोदः स्यादिति भावः।

(ड) उपालभमानेव अधिक्षिपन्तीव।

(त) तुलयिष्यति आक्षिपति।

उट्ठेहि, इमिणा रत्तासोअपादवेण अन्तरिदाअ पेक्खदु दाव को एसोत्ति। (२२) तथा कृत्वेव।

विदू। एदं चन्दणलदाघरअं। ता एहि पविसम्ह (२३)।

नाट्येन प्रविशतः।

नायकः।

चन्दनलताग्रहमिदं सचन्द्रमणिशिलमपि प्रियं न मम।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः॥२३॥ (थ)

चेटो हहा। भट्टिदारिए! दिट्ठिआ वड्ढसि। सो एव्व णं दे हिअअवल्लहो जणो (२४)।

नायिका। हहा सहर्षं ससाध्वसम्। हञ्जे! एदं पेक्खिअ अदिसज्झसेण ण सक्कोमि इह एव्व आसणे चिट्ठिदुं, कदापि एसो पेक्खदि, ता एहि अण्णदो गच्छम्ह। सोत्कण्ठं पदं गत्वा। हञ्जे! वेवदि मे ऊरू (२५)।

---

(२२) हञ्जे! मा रैवतकाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयिष्यति, तदुत्तिष्ठ, अनेन रक्ताशोकपादपेन अन्तरिते प्रेक्षे तावत् क एष इति।

(२३) इदं चन्दनलताग्रहम्। तदेहि प्रविशावः।

(२४) भर्तृदारिके! दिष्ट्या वर्धसे? स एव ननु ते हृदयवल्लभो जनः।

(२५) हञ्जे! एनमेव्य अतिसाध्वसेन न शक्नोमि इहैवासने स्थातुम्, कदापि एष प्रेक्षते। तदेहि अन्यतो गच्छावः। हञ्जे! वेपते मे ऊरुः।

(थ) चन्द्रनेति। चन्द्रिकया ज्योत्स्नया रहितं निशायाः सुखमिव प्रारम्भ इव चन्द्राननया तया बालया रहितम् इदं चन्दनलताग्रहं चन्द्रमणिशिलया चन्द्रकान्तमयशिलया सहितमपि मम प्रियं न।

चेटी। विदूषक। मह आयरे! इह ठिदं तुमं को पेक्खदि? णं विसुमरिदो दे अयं रत्तासोअपादवो, ता इह एव्व उवविसिअ चिट्ठह (२६)। तथा कृतः।

विदू। निरूप्य भो वयस्स! एसा सा चन्द्रमणिसिला? (२७)।

नायकः। सवाष्पं निःश्वसिति।

चेटी। भट्टिदारिए! जाणामि सिविणआलावो विअ। ता अवहिदा दाव सुणह (२८)। उभे आकर्णयतः।

विदू। हर्षेण चालयन्। भो वयस्स! णं भणामि एसा सा चन्द्रमणिसिलेत्ति (२९)।

नायकः। सवाष्पं निःश्वस्य। सम्यगुपलक्षितम्। हर्षेण निर्दिश्य।

यत्रिमणिशिला सेयं यस्यां विपाण्डुरमाननं
करकिसलये कृत्वा वामे घनस्वसितोदरा।
चिरयति मयि व्यक्ताकूता मनाक् स्फुरिताधरा
विरमितमनोमन्युर्दृष्टा मया रुदती प्रिया॥ २४॥ (द)

---

(२६) अयि कातरे! इह स्थितां त्वां कः प्रेक्षते? ननु विस्मृतस्ते अयं रक्ताशोकपादपः, तदिहैव उपविश्य तिष्ठावः।

(२७) भो वयस्य! एषा सा चन्द्रमणिशिला।

(२८) भर्तृदारिके! जानामि स्वप्नालाप इव, तदवहिते तावच्छृणुवः।

(२९) भो वयस्य! ननु भणामि। एषा सा चन्द्रमणिशिलेति।

(द) यत्रिमणिशिलेति। सा इयं यत्रिमणिशिला, चन्द्रकान्तशिला यस्यां शिलायां मयि चिरयति विलम्बमाने वामे करकिसलये प्रिया

उट्ठेहि, इमिणा रत्तासोअपादवेण अन्तरिदाअ पेक्खन्ह-
दाव को एसोत्ति। (३२) तथा कुरुतः।

विदू। एदं चन्दणलदाघरअं। ता एहि पविसम्ह (३३)।

नाट्येन प्रविशतः।

नायकः।

चन्दनलतागृहमिदं सचन्द्रमणिशिल्पमपि प्रियं न मम।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः॥३३॥ (य)

चेटी हृदा। भट्टिदारिए। दिट्ठिआ वड्ढसि। सो एव्व ण दे हिअअवल्लहो जणो (३४)।

नायिका। हृदा सहर्षं समाश्वसन्ती। हञ्जे। एदं पेक्खिअ अदिसञ्झसेण ण सक्कोमि इह एव्व आसणे चिट्ठिदुं, कदापि एसो पेक्खदि, ता एहि अण्णदो गच्छम्ह। नेपथ्याभिमुखं पदं गत्वा। हञ्जे। वेवदि मे ऊरू (३५)।

---

(३२) हञ्जे! मा ईदृशमाकारं प्रेक्ष्य कोऽपि मे हृदयं तुलयिष्यति, तदुत्तिष्ठ, अनेन रक्ताशोकपादपेन व्यवधीयते मे यावत् स एष इति।

(३३) इदं चन्दनलतागृहम्। तदेहि प्रविशावः।

(३४) भर्तृदारिके! दिष्ट्या वर्धसे? स एव ननु ते हृदयवल्लभो जनः।

(३५) हञ्जे! एनमेवं प्रेक्ष्य अतिसाध्वसेन न शक्नोमि इहैवासने स्थातुम्, कदापि एष प्रेक्षते। तदेहि अन्यतो गच्छावः। हञ्जे! वेपते मे ऊरुः।

(य) चन्द्रेति। चन्द्रिकया ज्योत्स्नया रहितं निशायाः सदृशमिव प्रारम्भ इव चन्द्राननया तया कान्तया रहितम् इदं चन्दनलतागृहं चन्द्रमणिशिल्पया चन्द्रकान्तपाषाणेन रहितमपि मम प्रियं न।

चेटी। विदूषक। भट्ट कायरे! इह ट्ठिदं तुमं को पेक्खदि? णं विसुमरिदो दे अयं रत्ताभोयपादवो, ता इह एव्व चअविसिअ चिट्ठम्ह (३६)। तथा कुरुतः।

विदू। निरूप्य भो वयस्स! एसा सा चन्दमणिसिला? (३७)।

नायकः। सर्वं निरूपयति।

चेटी। भट्टिदारिए! जाणामि सिविणआलावो विअ। ता अवहिदा दाव सुणसु (३८)। उभे आकर्णयतः।

विदू। उल्लेन चायवरं। भो वयस्स! णं भणामि एसा सा चन्दमणिसिलेत्ति (३९)।

नायकः। सर्वं निश्चित्य। सम्यगुपलक्षितम्। हर्षेण निर्वर्ण्य।

शशिमणिशिला सैव सा विपाण्डुरमाननं
करकिसलये क्षिप्त्वा वामे घनश्वसितोद्गमा।
चिरयति मयि व्यक्ताकूता मनाक् स्फुरिताधरा
विरमतनलामिन्यदृष्टा मया रुदती प्रिया॥ २४॥ (ट)

(३६) अयं नायकः। इह स्थितं तं कः पेक्षते? ननु विस्मृतो मया रक्ताशोकपादपः, तिष्ठैव तावत्पश्यावः।

(३७) भो वयस्य! एषा सा चन्द्रमणिशिला।

(३८) भर्तृदारिके! जानामि स्वप्नालापमिव इदं, तदवधत्ते तावच्छृणुवः।

(३९) भो वयस्य! ननु भणामि। एषा सा चन्द्रमणिशिलेति।

(ट) शशिमणिशिलेति। सा इयं शशिमणिशिला, चन्द्रकान्तशिला यद्वा शिलाया मयि चिरयति विलम्बमाने वामे करकिसलये क्षिप्त्वा

नायकः । वयस्य ! जाने तामेवास्यां शिलायामालिख्य मया चिरगतया आत्मानं विनोदयामीति, तदित एव गिरितटान्मनःशिलाशकलान्यादायागच्छ (प)।

विदू । जं भवं आणवेदि । परिक्रम्य स्कन्धोपरिस्थम् । भो वयस्स ! तुए एक्को वसुओ आणत्तो, मए उण इह एव्व सुलहपञ्चरायणो वसुआ आणीदेत्ति, आलिहदु भवं (४८) । उपनयति ।

नायकः । वयस्य ! साधु कृतम । स्वीकृत्य । शिलायामालिखन् सरोमाञ्चम् । सखे ! पश्य—

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य मुखयति रेखापि प्रथमदृष्टेयम् ॥ २६ ॥ (फ)

लिखति ।

विदू । सकौतुकं निर्वर्ण्य । अवअक्खेवि एव्व णाम रूअं लिहीअदि, अहो अच्छरिअं ! । (४९) ।

---

(४८) यद्वयात् व्याहरति, भो वयस्य ! त्वया एको वसुः आज्ञप्तः मया पुनरिहैव सुलभपञ्चरायणो वसुः आनीत इति आलिखतु भवान् ।

(४९) अवलक्ष्योपि एवं नाम रूपं लिख्यते, अहो आश्चर्यम् ।

(प) मनःशिलाशकलानि मनःशिलाख्यधातुखण्डान् ।

(फ) अक्लिष्टेति । दयितायाः प्रियायाः मुखस्य शशिन इव चन्द्रस्येव नयनोत्सवस्य नेत्रानन्दिनः अधरस्य अक्लिष्टा अनुना बिम्बस्येव तदाख्यफलस्येव शोभा यस्यां तादृशी प्रथमदृष्टा सकृदवलोकिता इयं रेखापि सुखयति आनन्दयति । आर्याछन्दः ।

नायकः। सखेतम्। वयस्य!—

प्रिया सन्निहितैवेयं सङ्कल्पस्थापिता पुरः।
दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत् कोऽत्र विस्मयः॥२७॥ (ब)

नायिका। साक्षम्। चतुरिए! जाणिदं क्खु कहावसाणं, ता एहि दाव मित्तावसुं पेक्खस्ह (५०)

चेटी। सविषादमात्मगतम्। जीविदणिरवेक्खो विअ से उल्लावो। (भ) प्रकाशम्। भट्टिदारिए! णं गदा एव्व तहिं मणोहारिआ, ता कदापि भट्टा मित्तावसू इह एव्व आअच्छदि (५१)।

ततः प्रविशति मित्रावसुः।

मित्रा। आज्ञापितोऽस्मि तातेन, यया वत्स मित्रावसो! जीमूतवाहनोऽस्माभिरिहासन्नभावान् सुपरोक्षि-

---

(५०) चतुरिके! ज्ञातं खलु कथावसानं, तदेहि तावन्मित्रावसुं प्रेक्षावहे।

(५१) जीवितनिरपेक्ष इत्यस्या उल्लापः। भट्टिदारिके! नन्वगतैव तत्र मनोहारिका, तत् कदापि भर्ता मित्रावसुरिहैवागच्छति।

(ब) प्रियेति। पुरः अग्रतः सङ्कल्पेन मानसकल्पनया स्थापिता अतएव सन्निहितैव समीपवर्त्तिन्येव प्रिया, अतः दृष्ट्वा दृष्ट्वा सङ्कल्पस्थापितामिति शेषः यदि लिखामि तत् तदा अत्र लिखने को विस्मयः आश्चर्यम्, नैवाश्चर्यमित्यर्थः।

(भ) जीवितनिरपेक्षः जीवनाकाङ्क्षारहितः। उल्लापः आलापः वचनमित्यर्थः यदि एनं प्रियजनं न प्राप्नोति तदा जीवितं त्यक्ष्यतीयमिति भावः।

सौऽयं, कुतोऽस्माद्योग्यो वरः, तदस्मै वत्सा मलयवती प्रतिपाद्यतामिति, अहन्तु स्नेहपराधीनतया अन्यदेव किमप्यवस्थान्तरमनुभवामि (म)। अन्यच्च,

यद्विद्याधरराजवंशतिलकः प्राज्ञः सतां सम्मतो
रूपेणाप्रतिमः पराक्रमधनो विद्वान् विनीतो युवा।
यश्चासूनपि सत्त्वजेत् करुणया सत्त्वार्थ मभ्युद्यत-
स्तेनास्मै दयितः स्वसारमतुलां तृप्तिर्विषादश्च मे ॥२८॥ (य)

श्रुतञ्च, यथा—जीमूतवाहनो गौर्याश्रममण्डपे चन्दनलतागृहे वर्त्तत इति, तदेतत् चन्दनलतागृहं यावत् प्रविशामि। प्रविशति।

विदू। सखे, ममवलोक्य। भो वयस्य! पच्छादेहि

(म) आसन्नभावात् निकटस्थितत्वात् सुपरीक्षितः वरत्वेनेति भावः। प्रतिपाद्यतां समर्प्यताम्। स्नेहपराधीनतयेत्यादि परिचायता वत्सा मलयवती मां लक्ष्यीकृत्य मत्तुल्यं मां मन्यतीति स्नेहकातरतां मनोऽस्मीति भावः।

(य) यदिति। विद्याधरराजवंशतिलकः प्राज्ञः यदयमहं सतां साधूनां सम्मतः रूपेण अप्रतिमः अतुल्यः पराक्रमः महावीर इत्यर्थः विनीतः विनयसम्पन्नः युवा इति यत् तथा करुणया अनुकम्पया सत्त्वार्थं प्राणिरक्षणार्थम् अभ्युद्यत उद्युक्तः सन् अहन् प्राणानपि सन्त्यजेदिति यत् तेन उक्तहेतुविधेन हेतुना अस्मै जीमूतवाहनाय अतुलां निरुपमां स्वसारं भगिनीं दयितो मे मम तृप्तिः हर्षः विषादश्च भवतीति शेषः अतिसुपात्रे अस्मिन् भगिनीदाने हर्षः, कस्यापि जीवनाय स्वजीवनदाने भगिन्या वैधव्यापत्तिरिति विषाद इति भावः। यादृच्छिकोक्तिरियं दृत्तम्।

'इमिणा कमलीवत्तेण इमं चित्तगदं कय्यं, एसो क्खु सिद्धजुवराओ मित्तावसू इह आगदो कदापि पेक्खिअ. स्सदि (५२)।

नायकः । कदलीपत्रेण प्रच्छादयति ।

मित्रा । प्रविश्य । कुमार ! मित्रावसुः प्रणमति ।

नायकः । दृष्ट्वा । मित्रावसो ! स्वागतम्, इतःस्थीयताम् ।

चेटी । भट्टिदारिए ! आअदो भट्टा मित्तावसू (५३)।

नायिका । हञ्जे ! प्रियं मे (५४)।

नायकः । मित्रावसो ! अपि कुशलौ सिद्धराजौ विश्वावसुः ?।

मित्रा । कुशलौ तातसन्देशेनास्मि त्वत्सकाशमागतः ।

नायकः । किमाह तत्रभवान् ?।

नायिका । सुणिस्सं दाव—किं तादेण कुसलं संदिट्ठं त्ति (५५)!

मित्रा । शृणु । इदमाह । तात, अस्ति मे मलयवती नाम कन्या जीवितमवाप्य सर्वस्यैव सिद्धराजान्वयस्य, सा मया तुभ्यं प्रतिपाद्यते । प्रतिगृह्यतामिति ।

---

(५२) भो वयस्य ! प्रच्छादय अनेन कदलीपत्रेण इमं चित्रगतं कन्यकाम्, एष खलु सिद्धयुवराजो मित्रावसुरिहागतः कदापि प्रेक्षिष्यते ।

(५३) भर्तृदारिके ! आगतो भर्ता मित्रावसुः ।

(५४) हञ्जे ! प्रियं मे ।

(५५) श्रोष्यामि तावत् । किं तातेन कुशलं सन्दिष्टमिति ।

चेटी। विहस्य। भट्टिदारिए! किं ण कुप्पसि दाणीं (५६)।

नायिका। सखिकं खलज्जन अधोमुखी स्थिता। हञ्जे! मा हस, किं विसुमरिदं दे एदस्स असहिअवत्तणं (५७)

नायकः। सापवार्थं। वयस्य! सङ्कटे पतितोऽस्मि।

विदू। सापवार्थं। भो! जाणामि, ण तं वज्जिअ दे अ खेहिं चित्तं अहिरमेदि, जधा तधा जं किम्पि भणिअ विसज्जीअदू एसो (५८)।

नायिका। सरोषकाकुगतम्। हदास! को वा एदं ण जाणादि (५९)।

नायकः। क इह नेच्छेद् भवद्भिः सह साध्वमीदृशं सम्बन्धम्, किन्तु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतः प्रवर्त्तयितुं, ततो नाहमेनां प्रतिग्रहीतुमुत्सहे।

नायिका। मूर्च्छां नाटयति।

चेटी। सज्जसज्जदु समस्सासदु भट्टिदारिआ (६०)।

विदू। भो! पराधीणो क्खु एसो, किं एदिणा अब्भत्थिदेण, ता गुरुअणं से गदुअ अब्भत्थेहि (६१)।

---

(५६) भर्तृदारिके! किं न कुप्यसीदानीम्?

(५७) हञ्जे! मा हस किं विस्मृतं ते एतस्यान्यहृदयत्वम्?

(५८) भो! जानामि, न तां वर्जयित्वा ते अन्यत्र चित्तमभिरमते, यथा तथा यत् किमपि भणित्वा विसर्ज्यतामेषः।

(५९) हताश! को वा एतन्न जानाति।

(६०) समाश्वसितु समाश्वसितु भर्तृदारिका।

(६१) भो! पराधीनः खल्वेषः, किमनेनाभ्यर्थितेन। तद्गुरुजनमेव गत्वा अभ्यर्थय।

मित्रा। आत्मगतम्। साधूक्तम्, नायं गुरुजनमतिक्रामति एष गुरुरप्यस्मिन्नेव गौर्य्याश्रमे प्रतिवसति, तद् यावद्गत्वा अस्य पित्रा मलयवतीं याचयामि।

नायिका। तथास्त्विति।

मित्रा। एवं निवेदितात्मनोऽस्मान् प्रत्याचक्षाणः (१) कुमार एव बहुतरं जानाति।

नायिका। सरोषं विहस्य। कहं पच्छाक्खाणलङ्घ मित्तावसू पुणोवि मन्तेदि (६२)।

मित्रावसुर्निष्क्रान्तः।

नायिका। आत्मगतम् साक्षमात्मानं पश्यन्ती। किं मम एदिणा दोहग्गकलङ्कमइलेण अच्चन्तदुक्खभाइणा अज्जावि सरीरेण धारिदेण, ता इह जेव्व असोअपाअवे इमाए अदिमुत्तलदाए उव्वन्धिअ अत्ताणं वावादइस्सं, ता एदं एव्वं दाव। प्रकाशं विलक्षितेव। हञ्जे! पेक्खु दाव मित्तावसू गदो ण वेत्ति जेण अहम्पि इदो गमिस्सं (६३)।

वेटी। कतिचित् पदानि गत्वा अवलोक्य आत्मगतम्।

---

(६२) कथं प्रत्याख्यानलघु मित्रावसुः पुनरपि मन्त्रयति।

(६३) किं मम एतेन दौर्भाग्यमलिनेन अत्यन्तदुःखभागिना अद्यापि शरीरेण धारितेन, तदिहैव अशोकपादपे अनया आतिसङ्कलतया उद्बध्य आत्मानं व्यापादयिष्यामि, तदिदमेवन्तावत्, हञ्जे! प्रेक्षस्व तावत् मित्रावसुर्गतो नवेति येन अहमपि इतो गमिष्यामि।

---

(१) प्रत्याचक्षाणः परिहरन्।

अणारिसं से हिअअं पेक्खामि, ता ण गमिस्सं। इह चेअ ओवारिदा पेक्खामि किं एसा पडिबज्झदित्ति (६४)।

नायिका। द्वितीयवक्षोजं पार्श्वं स्पृष्ट्वा सास्रम्। भगवति गोरिए! तुए इह ण किदो (ल) ता अण्णम्मि जम्मन्तरे जधा ण ईदिसी दुक्खभाइणी होमि तधा करेसि (६५)। इत्यभिधाय कण्ठे पाशमर्पयति।

चेटी। हहा ससम्भ्रमसुपसृत्य। परित्ताअदु परित्ताअदु अज्जो, एसा भट्टिदारिआ उव्वन्धिअ अत्ताणअं वाबादेदि (६६)।

नायकः। समन्ततोऽवलोक्य। कासौ? कासौ?।

चेटी। इअं असोअपादवे (६७)।

नायकः। सहर्षमवलोक्य। सैवेयमस्मन्मनोरथभूमिः।

नायिकां पाणौ स्पृष्ट्वा लतापाशमाकर्षति।

न खलु न खलु मुग्धे! साहसं कार्यमीदृक्
व्यपनय करमेतं पल्लवाभं लतायाः।

---

(६४) अन्यादृशमस्या हृदयं प्रेक्षे, तत्र गमिष्यामि इहैवावतारिता प्रेक्षे किमेषा प्रतिपद्यते इति।

(६५) भगवति! गौरि! त्वया इह न कृतः, तत्त्वन्यस्मिन्नपि जन्मान्तरे यथा न ईदृशी दुःखभागिनी भवामि तथा करिष्यसि।

(६६) परित्रायतां परित्रायतामार्यः, एषा भर्तृदारिका उद्बध्य आत्मानं व्यापादयति।

(६७) इयमशोकपादपे।

(ल) इह अस्मिन् जन्मनि न कृतः प्रसाद इति शेषः।

कुसुममपि विचेतुं यो न मन्ये समर्थः,
कलयति स कथन्ते पाशमुद्बन्धनाय ॥ २९ ॥ (व)

नायिका। असाध्वसम्। हञ्जे! को उण एसो ?। निरूप्य मरोयं हस्तमाक्षेप्तुमिच्छति। मुञ्च मुञ्च अमाहत्थम्, को तुमं णिवारेदुं। मरणेवि किं तुमं ज्जेव पव्भट्ठणीओ (६८)। (ग)

नायकः।

कण्ठे हारलतायोग्ये येन पाशस्त्वयार्पितः।
गृहीतः सापराधोऽयं कथन्ते मुच्यते करः ॥ ३० ॥ (घ)

विदू। भोदु, किं उण से इमस्स मरणव्ववसायस्स (ङ) कारणं ? (६९)।

---

(६८) हञ्जे! कः पुनरेषः ?। मुञ्च मुञ्चामहस्तम्, कस्त्वां निवारयितुम्। मरणेऽपि किं त्वमेवाभ्यर्थनीयः।

(६९) भवतु, किं पुनरस्या अस्य मरणव्यवसायस्य कारणम् ?

(व) नेति। हे सखे सुन्दरि! ईदृशं साहसम् अविमृश्यकारित्वं न खलु नैव न खलु नैव कार्यं कर्त्तव्यं त्वयेति शेषः एतं पद्मरागं किसलयनिभं करं लतायाः सकाशात् व्यपनय अपसारय। यस्तं करः कुसुममपि विचेतुं न समर्थ इति मन्ये स ते करः कथम् उद्बन्धनाय पाशं कलयति गृह्णाति। मालिनीछन्दो नवमयुतेयं मालिनी भोगिलोकैरिति लक्षणात्।

(ग) अभ्यर्थनीयः प्रार्थनीयः।

(घ) कण्ठे इति। त्वया येन करेण हारलतायोग्ये मुक्ताहारोचिते कण्ठे पाशः अर्पितः, सापराधः कृतापराधः स ते तव करः गृहीतः मयेति शेषः कथं मुच्यते त्यज्यते, अपराधी गृहीतो विना दण्डं न मोच्य इति भावः।

(ङ) मरणव्यवसायस्य मरणोद्योगस्य।

चेटी। णं एसो एव्व ते पिअवअस्सो (७०)।

नायकः। कथमहमेवास्या मरणकारणम्, न खल्वपगच्छामि।

विदू। भोदि! कहं विअ (७१)।

चेटी। शाकुतम्। जा सा पियवअस्सेण दे काबि छिप्पअवल्लहा सिलाअले आलिहिआ, ताए पक्खवादिणा एदेण पडिवादअन्तस्सवि मित्तावसुणो णाहं पडिच्छदेत्ति जादणिव्वेदाए इमाए एव्वं ववसिदं (७२)। (इ)

नायकः। सहर्षमात्मगतम्। कथमियमेवासौ विद्याधरीदयिता मलयवती, अथवा रत्नाकराद्रेः कुतश्चन्द्रलेखायाः प्रसूतिः, हा! कथं वञ्चितोऽस्मि अनया।

विदू। भोदि! जदि एव्वं ता अणवरद्धो दाणीं पियवअस्सो। अहवा जइ मम ण पत्तिआअसि। तदा सअं ज्जेव्व सिलाअलं गदुअ पेक्खदु भोदी (७३)।

---

(७०) नन्वेष एव ते प्रियवयस्यः।

(७१) भवति! कथमिव।

(७२) या सा प्रियवयस्येन ते कापि छुटयवल्लभा शिलातले आलिखिता, तस्याः पक्षपातिना एतेन प्रतिपादयतोऽपि मित्रावसोर्नाहं प्रतीष्टेति जातनिर्वेदया अनया एवं व्यवसितम्।

(७३) भवति! यद्येवं तदनपराद्ध इदानीं प्रियवयस्यः, अथवा यदि मम न प्रत्येति, तदा स्वयमेव शिलातलं गत्वा प्रेक्षतां भवती।

(इ) प्रतिपादयतः दतः। प्रतीष्टा सङ्गोता। जातनिर्वेदया सञ्जातवैराग्यया। व्यवसितम् चेष्टितम्।

नायिका । सखे मत्सखस्य नायकं पश्यन्ती इत्तमाकर्षति ।

नायकः । सस्मितम् । न तावन्मुञ्चामि यावन्मम हृदयवल्लभां गिलायामालेख्यगतां न पश्यसि ।

सर्वे परिक्रामन्ति ।

विदू । कदलीपत्रमपनीय । भोदि ! पेक्ख पेक्ख एदं से हिअअवल्लहं जणं (७४) ।

नायिका । निरूप्य सापवार्यं सस्मितम् । चदुरिए ! अहं विअ आलिहिदा (७५) ।

चेटी । सित्रासोक्तिं निर्वर्ण्य । भट्टिदारिए ! किं भणासि अहं विअ आलिहिदेत्ति । इदिमं मीसारिच्छं (च) । जेण ण जाणीअदि किं दाव इह ज्जेव सिलाअले भट्टिदारिआए पाडिबिम्बं मइत्तं । उद तुमं आलिहिदेत्ति (७६) ।

नायिका । विहस्य । हञ्जे ! दुज्जणीकदम्हि इमिणा मं चित्तगदं दंसअन्तेण (७७) ।

विदू । णिव्वुत्तो दाणीं दे गन्धव्वो विवाहो (क) । ता

(७४) भवति ! पश्य पश्य एनमस्य हृदयवल्लभं जनम् ।

(७५) चतुरिके ! अहमिवालिखिता ।

(७६) भर्तृदारिके ! किं भणसि ? अहमिवालिखितेति । इदमयुक्तम् । येन न ज्ञायते किं तावदिहैव शिलातले भर्तृदारिकायाः प्रतिबिम्बं संक्रान्तमुत त्वमालिखितेति ।

(७७) दुर्जनीकृतास्मि अनेन मां चित्रगतां दर्शयता ।

(च) मीसादिसं सदृशत्वं सम्यक् सारूप्यमित्यर्थः ।

(क) निर्वृत्तः सञ्जातः । गान्धर्वविवाहः परस्परानुरागजनित उद्वाहः गान्धर्वः मनसायान्मिथ इति यास्कस्मरणात् ।

मुञ्च दाव से अग्गहत्थं। एसा क्खु काचि तुरिदतुरिदा इदो एव्व आअच्छदि (७८)।

नायकः। सञ्जातः।

ततः प्रविशति चेटी।

चेटी। सकर्म्मं। भट्टिदारिए! दिट्ठिया वड्ढसि। पडिच्छिदा क्खु तुमं भट्टिणो जीमूतवाहणस्स गुरूहिं (७९)।

विदू। हद्धन्। हो हो—भो सम्यूषा मणोरहा पियवयस्सस्स। अहवा णहि णहि। भोदीए मलयवदीए। अथवा ण एदाणं। भोजनमभिलषन्। मम ज्जेव्व एक्कस्स बम्हणस्स (८०)।

चेटी। नायिकासहिश्य। आणत्तम्हि जुअराजभित्ताबसुणा जह अज्ज ज्जेव्व मलयवदीए विवाहो ता लहुं तं गेण्हिअ आअच्छाहि। ता एहि गच्छम्ह (८१)।

---

(७८) निर्मुञ्च इदानीं ते गान्धर्वी विवाहः। सत्यं त्वं तावदस्या अग्रहस्तम्। एषा खलु काऽपि त्वरितत्वरिता इतएवाग च्छति।

(७९) भर्तृदारिके! दिष्ट्या वर्धसे। प्रतीष्टा खलु त्वं भर्तुर्जीमूतवाहनस्य गुरुभिः।

(८०) हो हो—भोः! सम्पूर्णा मनोरथाः प्रियवयस्यस्य। अथवा नहि नहि भवत्या मलयवत्याः। अथवा न एते योः। ममैव एकस्य ब्राह्मणस्य।

(८१) आज्ञप्तास्मि युवराजभिक्षावसुना यथा अद्यैव मलयवत्या विवाहः तत्क्षिप्रं तां गृहीत्वा आगच्छेति। तदेहि गच्छावः।

विदू। गदा क्खु तुमं दासीए धीए एदं गेण्हिअ। वअस्सेण किं इध एव्व भवदिव्वं ?। (८२)

चेटी। हदास! मा तुवर तुवर। तुम्हाणंपि ण्हपणकं (ख) आगदं एव्व (८३)

नायिका। सानुराग सतृष्णञ्च नायकं पश्यन्ती सपरिवारा निष्क्रान्ता।

नेपथ्ये वैतालिकः पठति।

हृष्या पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः
मद्यः सिन्दूरधूलीकृतदिवससमारम्भसम्भातपत्री:।
उद्गीतैरङ्गनानामरुणमणिरणन्नूपुरारावहृद्यै-
रुद्बाहुस्नानवेलां कथयति भवतः सिद्धये सिद्धलोकः। ३१। (ग)

---

(८२) गदा खलु त्वं दासीः धृत्वा इमां ग्रहीत्वा। वयस्येन किमिहैव अवस्थातव्यम् ?।

(८३) हताश! मा त्वरस्व त्वरस्व। युष्माकमपि स्नपनकमागतमेव।

(ख) स्नपनकं स्नानादिनवोढकं द्रव्यमाहर्तुं यावत्।

(ग) हृष्येति। इह खल्वस्मिन् मलये पर्वते पिष्टातकस्य हृद्या मेरुतुल्यां मेरुसदृशीं द्युतिं दधानः धारयन् मद्यः साम्प्रतं सिन्दूरधूलीभिः कृता दिवससमारम्भे प्रातःकालेऽपीति यावत् सम्भातपत्री सायंकाली सूर्यकिरणस्य श्रीर्येन तथाभूतः सिद्धलोकः अङ्गनानां नारीणाम् अरुणाः रक्ता मणयो येषु तादृशानां रणतां ध्वनतां नूपुराणाम् आरावेण ध्वनत्कृतेन हृद्यैः मनोहरैः उद्गीतैः उच्चैः गीतैरित्यर्थः षड्जमध्यमग्रामानां खलु गान्धारनामानं स लभ्यो देवयोनिभिरिति सङ्गीतशास्त्रनियमात्। भवतः तव जीमूतवाहनस्येति भावः सिद्धये शुभपरिणय-

विदू। आकर्ण्य! भो वयस्य! दिट्ठिया आगदं णट्ठपणअं (८४)।

नायकः। सङ्घर्षम्। यद्येवं किमिदानीमिह स्थितेन। आगच्छ तातं नमस्कृत्य स्नानभूमिमेव गच्छावः।

इति निष्क्रान्ताः सर्वे।

द्वितीयोऽङ्कः।

अथ तृतीयोऽङ्कः।

ततः प्रविशति मत्तो विदूषकश्चेटश्चषकहस्तो

विटः कल्याणीपरिवृतो नायकश्च।

विटः।

णिच्चं जो पिबइ सुरं जणस्स पिअमङ्गलस्स जो कुणइ।
अट्ठ ते दोसा बलदेवो कामदेवो अ॥ ३२॥ (ख)

(८४) भो वयस्य! दिष्ट्या आगतं नष्टपणयम्।

सम्यदनाय उद्वाहस्तोषणा वैवाहिकस्नानसमय कथयति स्नात्य त। अष्टशतम्।

(क) मत्तः मद्यपानेनेति शेषः। चषकहस्तः प्राप्तपानपात्रः। चषकोऽस्त्री पानपात्रमित्यमरः। विटः सम्भोगहीनसम्भृ विटस्तु धूर्तः कलैकदेशज्ञः। वेषोपचारकुशलो धाम्नो मधुरोऽथ बहुमतो-गोष्ठ्यामिलुकलक्षणः। चेटः प्रेष्यकारिजातीयकश्च अधमः सहायविशेषः। तदुक्तं दर्पणे, प्रेष्यकारस्य सहाया विटचेटविदूषकाद्याः स्युः। भक्ता नर्मसु निपुणाः पण्डितम्मन्याः युवा इति तथा शकारचेटाद्या अधमाः परिकीर्तिता इति च।

(ख) नित्यमिति। यः नित्यं सुरां पिबति, यश्च जनस्य प्रिय-

घूर्णन्। सफलं खलु मे शेखरकस्य (ग) जीवितम्।
वज्रःस्थले दयिता नीलोत्पलवासिता मुखे मदिरा।
शैलेऽस्मिन्न शेखरको नित्यं विभ चेटिका यस्य ॥३३॥ (घ)
प्रस्खलन्। अरे! को मां चालयति?। सक्रुधम्। अवश्यं नवमालिका मां परिहसति (१)।

चेटः। भर्तः! न च तावत् सा अद्यापि इहागच्छति (२)।

विटः। सरोषम्। पट्टनपहरे ज्जेव्व मलअवदीए विवाहमङ्गलं णिव्वत्तं। ता कीस सा दाणीं पभादेवि आगच्छदि। विचिन्त्य सक्रुधम्। अहवा विवाहमहोस्सवे

---

(१) नित्यं यः प्रियति सुरां जनस्य प्रियसङ्गमस्य यः करोति।
अथ तौ द्वावपि देवौ बलदेवः कामदेवश्च।
सफलं खलु मे शेखरकस्य जीवितम्।
वज्रःस्थले दयिता नीलोत्पलवासिता मुखे मदिरा।
शैले च शेखरको नित्यमिव चेटिका यस्य॥
अरे! को मां चालयति? अवश्यं नवमालिका मां परिहसति।

(२) भर्तः! न च तावत् सा अद्यापि इहागच्छति।

सङ्गमं प्रियजनेन सङ्गमं करोति, तौ बलदेवः कामदेवश्चेति द्वौ देवौ। बलदेवस्य सुराप्रियत्वात् कामदेवस्य विलासित्वादिति भावः।

(ग) शेखरकस्य तदाख्यस्य।

(घ) वज्रःस्थले दयिता प्रिया, मुखे नीलोत्पलवासिता नीलोत्पलसुरभिः मदिरा, यस्य नित्यं चेटिकेव सङ्गिनी दासीव तिष्ठतीति शेषः स शेखरकः शैले च गिरौ च सर्वेषामिति शेषः तिष्ठतीति शेषः सर्वश्लोकेभ्यः शेखरकोऽहं श्रेष्ठः सुखीवेति भावः।

सव्वो एव्व पियपणइणीजणसणाहो सिद्धविज्जाहरलोओ कुसुमाअरुज्जाणे आपाणअसोक्खमणुभविस्सदित्ति (ङ) तक्केमि तहिं जेव्व णोमालिआ मं अवेक्खमाणा चिट्ठदि। ता तहिं जेव्व गमिस्सं। कोदिसो णोमालिआए विणा सेहरओ (३)।

प्रस्तुतलक्षिकामति।

चेटः। एदु एदु भट्टके! एदं कुसुमाअरुज्जाणं। ता पविसदु भट्टके! (४)। उभौ प्रवेशं नाटयतः।

ततः प्रविशति स्खलन्यस्तस्खलद्युगलो विदूषकः।

विदू। सम्मुहा मणोरहा पियवअस्सस्स। सुदं कुमए वि पियवअस्सो कुसुमाअरुज्जाणं गमिस्सदित्ति। ता आव तहिं एव्व गमिस्सं। परिक्रम्यावलोक्य च। इदं कुसुमाअरुज्जाणं। आव पविशामि णं। प्रविश्य भ्रमरबाधां नाटयन्। अरे! कोस उण दुट्ठमहुअरा मं एव्व अभिभवन्ति। आत्मानमाघ्राय। भोदु जाणिदं। जं तं मलय-

---

(३) प्रथमप्रकारे एव सर्वयात्रा विवाहमङ्गलं [illegible] वृत्तम्। तत् कथं सा इदानीं प्रभातेऽपि नागच्छति। अथवा विवाहमङ्गलेऽत्र सर्व एव प्रियप्रणयिणीजनसनाथः सिद्धविद्याधरलोकः कुसुमाकरोद्याने आपानसौख्यमनुभविष्यतीति तर्कयामि तत्रैव नवमालिका मामु अवेक्षमाणा तिष्ठति। तत्रैव गमिष्यामि। कीदृशी नवमालिकया विना शेखरकः।

(४) एतु एतु भर्त्ता। इदं कुसुमाकरोद्यानम्। ततः प्रविशतु भर्त्ता।

(ङ) आपानसौख्यं सुरापानजनितं सुखमित्यर्थः।

वदीबन्धुजणेण जामादुअस्स वअस्सोत्ति कदुअ सबहुमाणं वअकेहिं विचित्तिदोम्हि। सन्तापकुसुमसेहरअं च मम सीसे पिणद्धं। सो क्खु एसो पच्चासरो अप्पत्थीभूदो। किं दाणिं एत्थ करइस्सं। अधवा एदेण लेव्व मलअवदीसभासादो लद्धेण रत्तंसुअजुअलेण इत्थिअवेसं विहिअ उत्तरीअकअवगुण्ठणं गमिस्सं। पेच्छामि दाव किं दासीए पुत्ता मधुअरा करइस्सन्ति ? (५)। तथा करोति।

विटः। निरूप्य सहर्षम्। अरे चेड़ा! अङ्गुल्या निर्दिश्य सहासम्। एसा क्खु णोमालिआ आअदा। मं पेक्खिअ चिरस्स आअदीत्ति कुविदा अवगुण्ठणं कदुअ अक्खदो गच्छदि। ता कण्ठे गेण्हिअ पसादेमि णं (६)। सहसोपसृत्य कण्ठे गृहीत्वा मुखे ताम्बूलं दातुमिच्छति।

---

(५) सम्भृतो मनोरथः प्रियवयस्यस्य। श्रुतं खलु मयापि प्रियवयस्यः कुसुमाकरोद्यानं गमिष्यतीति। तद्यावत्तत्रैव गमिष्यामि। इदं कुसुमाकरोद्यानम्। यावत् प्रविशाम्येतत्। अरे! कथं पुनर्दृष्टमधुकरा मामेव अभिभवन्ति। भवतु ज्ञातम्। यत्तन्मलयवतीबन्धुजनेन जामातृवयस्य इति ज्ञात्वा सबहुमानं वयस्यैर्विचित्तितोऽस्मि। सन्ताकुसुमशेखरकञ्च मम शीर्षे पिनद्धम्। स खलु एषः अत्यादरः अनर्थीभूतः। किमिदानीमत्र करिष्यामि। अथवा एतेनैव मलयवतीसकाशाल्लब्धेन रक्तांशुकयुगलेन स्त्रीवेषं विधाय उत्तरीयकृतावगुण्ठनो गमिष्यामि। प्रेक्षे तावत् किं दास्याः पुत्रा मधुकराः करिष्यन्ति ?।

(६) अरे चेट! एषा खलु नवमालिका आगता। मां प्रेक्ष्य कथं चिरस्यागत इति कुपिता अवगुण्ठनं कृत्वान्यतो गच्छति। तत् कण्ठे गृहीत्वा प्रसादयाम्येनाम्।

विदू। भवतु सूचयन् नासिकां मुद्रयित्वा पराङ्मुखः स्थित्वा। कहं एक्काणं महुअराणं सआसादो परिब्भट्ठो दाणिं अण्णस्स दुट्ठमहुअरस्स मुहे पडिदाम्हि (७)।

विटः। कहं कोवेण परम्मुही भूदा? प्रणामं कुर्वन् विदूषकस्य चरणमात्मनः शिरसि कृत्वा। पसीद णीमालिए! पसीद (८)।

ततः प्रविशति चेटी।

चेटी। आणत्तम्हि भट्टिदारिआए। हञ्जे णीमालिए! कुसुमाअरुज्जाणं गदुअ उज्जाणपालिअं पल्लविअं भणाहि। अज्ज! सविसेसं तमालवीहिअं सज्जीकरेहि। मलअवदीसंहिदेण जामाउकेण तत्थ गन्तव्वंति। आणत्ता मए पल्लविआ। ता जाव रअणीविरहवड्ढिदुक्कण्ठं पिअवअस्सअं सेहरअं अक्खेसामि। दट्ठा। एसो सेहरओ। सरोषम्। कहं अहं कम्मि इत्थिअं पसादेदि। ता इह ट्ठिदा एव्व जाणामि का एसेत्ति (९)।

---

(७) कथमेतेषां मधुकराणां सकाशात् परिभ्रष्टः इदानीमन्यस्य दुष्टमधुकरस्य मुखे पतितोऽस्मि।

(८) कथं कोपेन पराङ्मुखीभूता? प्रसीद नवमालिके! प्रसीद।

(९) आज्ञप्तास्मि भर्तृदारिकया हञ्जे नवमालिके! कुसुमाकरोद्यानं गत्वा उद्यानपालिकां पल्लविकां भण। अद्य सविशेषं तमालवीथिकां सज्जीकुरु। मलयवतीसहितेन जामात्रा तत्र गन्तव्यमिति। आज्ञप्ता मया पल्लविका। तदावत् रजनीविरहवर्द्धितोत्कण्ठं प्रियवयस्यं शेखरकमाख्यामि। एष शेखरकः। कथमन्यां कामपि स्त्रियं प्रसादयति। तदिह स्थितैव जानामि कैषेति।

विटः। सकर्षम्।

हरिहरपितामहाणं पि गव्विदो जो ण जाणइ णमिदुं।
सो सेहरओ चलणेसु तुज्झ णोमालिए! पडइ ॥६४॥ (१०)

विदू। दासीए पुत्ता! मत्तवालआ! कुदो एत्थ णोमालिआ (११)।

चेटी। निरूप्य सलज्जितम्। कहं मं ति करिअ मदपरव्वसेण सेहरएण अज्जअत्तेओ पसादीअदि। ता जाव अलीअकीवं करिअ दुवेवि एदे परिहसिस्सं (१२)।

चेटः। चेटीं दृष्ट्वा शेखरकं कृत्रिमं चालयन्। भट्टका! मुञ्च एदं, ण भोदि एसा णोमालिआ, एसा उण रोसारत्तेहिं लोअणेहिं पेक्खन्ती आअदा (१३)।

चेटी। उपसृत्य। सेहरअ! का उण एसा पसादीअदि? (१४)।

विदू। अवगुण्ठनमवतार्य। भोदि! कोवि बम्हणो अहं मन्दभागधेओ पडन्तो (१५)।

---

(१०) हरिहरपितामहानामपि गर्वितो यो न जानाति नन्तुम्।
स शेखरकस्तवरणेषु तव नवमल्लिके! पतितः॥

(११) दास्याः पुत्र! मत्तबालक! कुतोऽत्र नवमल्लिका।

(१२) कथं मामिति ज्ञात्वा मदपरवशेन शेखरकेण आर्यायत्वेन प्रसाद्यते। तदायत्तं अलीकं कोपं कृत्वा द्वावप्येतौ परिहसिष्यामि।

(१३) भर्तर्मुञ्चैतम्। न भवत्येषा नवमल्लिका। एषा पुनरेषा-रक्तैर्लोचनैः प्रेक्षमाणा आगता।

(१४) शेखरक! का पुनरेषा प्रसाद्यते?

(१५) भवति! कोऽपि ब्राह्मणोऽहं मन्दभागधेयोपयुक्तः।

विटः। विदूषकं निरूप्य। **अरे कपिलमंकडुआ (च) तुमम्मि सेहरअं पदारेसि? अरे चेडा! गेण्ह एदं, जाव णोमालिअं पसादेमि (१६)।**

चेटः। **जं भट्टके आणवेदि (१७)।**

विटः। विदूषकं सङ्गा चेट्याः पादयोः पतति। **पसीद णोमालिए! पसीद (१८)।**

विदू। आत्मगतम्। **एसो मे अवक्कमिदुं अवसरो (१९)।** पलायितुमीहते।

चेटः। विदूषकं यज्ञोपवीते गृह्णाति यज्ञोपवीतं त्रुटति। **कहिं कहिं कपिलमंकडुआ पलाअसि (२०)।** तदुत्तरीयेणैव मुखे बद्ध्वा कर्षति।

विदू। **भोदि णोमालिए! पसीद मुञ्चादेहि मं (२१)।**

चेटी। विहस्य। **जइ भूमीए सीसं णिवेसिअ पादेसु मे पडसि (२२)।**

---

(१६) अरे कपिलमर्कट! त्वमपि शेखरकं प्रदारयसि? अरे चेट! गृहाणैतम्। यावत् नवमालिकां प्रसादयामि।

(१७) यत् भर्त्रा आज्ञापयति।

(१८) प्रसीद नवमालिके! प्रसीद।

(१९) एष मेऽपक्रमितुमवसरः।

(२०) क्व क्व कपिलमर्कट! पलायसे?

(२१) भवति नवमालिके! प्रसीद मोचय माम्।

(२२) यदि भूमौ शीर्षं निवेश्य पादेषु मे पतसि।

(च) कपिलमर्कट! वर्णकविशेषरञ्जितगात्रत्वात् पिङ्गलवर्णो वानरोऽत्र।

विदू। धरोर्भ वक्तव्यम्। भो! गन्धर्वराजमित्तो ब्राह्मणो भविअ दासीए धीआए पादेसु पडइस्सं (२३)।

चेटी। अङ्गुल्या तर्जयन्ती सलज्जम्। दाणिं पाडइस्सं, सेहरअ! उट्ठेहि, पसण्णा दे अहं। कण्ठे गृह्णाति। एसो उण जामाउकस्स पिअवअस्सो तुए खलीकदो, एव्वञ्च सुणिअ कदापि भट्टा मित्तावसू तव कुप्पइ, ता आदरेण सम्माणेहि णं (२४)।

विटः। जं णोमालिआ आणवेदि। विदूषकं कण्ठे गृहीत्वा। भव्व! तुमं मए सम्बन्धिकोत्ति करिअ परिहसिदो। धूर्तेन। किं सच्चकं जेव्व सेहरओ किं कदो परिहासो?। उत्तरीयं वर्त्तुलीकृत्य आसनं ददाति। इह उवविसदु सम्बन्धिको (२५)।

विदू। स्वगतम्। दिट्ठिआ अवगदो विअ से मदावेगो (२६)। उपविशति।

---

(२३) भो गन्धर्वराजमित्रः ब्राह्मणो भूत्वा दास्याः पुत्र्याः पादेषु पतिष्यामि।

(२४) इदानीं पातयिष्यामि। शेखरक! उत्तिष्ठ। प्रसन्ना तेऽहम्। एष पुनर्जामातुः प्रियवयस्यत्वया खलीकृतः। एवञ्च श्रुत्वा कदापि भर्त्ता मित्रावसुस्तव कुप्यति। तदादरेण सम्मानयैनम्।

(२५) यवनमालिका आज्ञापयति—आर्य्य! त्वं मया सम्बन्धीति कृत्वा परिहसितः किं सत्यमेव शेखरकः, किं कृतः परिहासः? इह उपविशतु सम्बन्धी।

(२६) दिष्ट्यापगत इवास्य मदावेगः।

विटः। णोमालिए! उवविस तुमम्मि एदस्स पासे, जेण दुवेवि तुम्हे समं एव्व सम्माणइस्सं (२७)।

वेटी। विहस्योपविशति।

विटः। चषकमादाय। अरे चेडा! सुभारिदं खु एदं करेहि चसकं सुराए (२८)।

चेटः। नाट्येन चषकभरणं करोति।

विटः। स्त्रियाः शेखरात् (क) पुष्पाणि गृहीत्वा चषके विन्यस्य जानुभ्यां स्थित्वा नवमालिकायाः उपनयति। णोमालिए! चाक्खअ देहि एदं एदस्स (२९)।

चेटी। सस्मितम्। जं सेहरओ भणादि (३०)। तथा कृत्वा विटस्यार्पयति।

विटः। विदूषकस्य चषकमर्पयति। एदं णोमालिआमुह-संसग्गसविसेसवासिअरसं सेहरअण्णेण केणवि अणासादिदपुव्वं, ता पिबेहि एदं, किं ते अदोवि अवरं सम्माणं करइस्सं (३१)।

---

(२७) नवमालिके! उपविश त्वमपि एतस्य पार्श्वे, येन द्वावपि युवां समभेव सम्मानयिष्यामि।

(२८) अरे चेट! सुपरिपूर्णं खल्वेतं चषकं कुरु सुरया।

(२९) नवमालिके! आस्वादय देहि एतस्मै।

(३०) यत् शेखरको भणति।

(३१) एतं नवमालिकामुखसंसर्गसविशेषवासितरसं शेखरकाद्येन केनाप्यनास्वादितपूर्वम्। तत् पिबैनत्। किं तेऽतोऽप्यपरं सम्मानं करिष्यामि।

(क) स्त्रियाः शेखरात् निजशिरोभूषणमाल्यात्।

विदू। सवेलक्खियं कदा। सेहरक! बम्हणो कदु अहं (३२)।

विटः। जदि तुमं बम्हणो, ता कहिं ते णवसुत्तं (३३)। (ज)

विदू। तं कदु मे इमिणा चेडेण कट्ठीअमाणं छिण्णं (३४)।

चेटी। विहस्य। अइ एव्वं, ता वेदकुराइम्मि दाव कत्तिअ उदाहर (३५)।

विदू। भोदि! इमिणा सोधुगन्धेण कहिं वेदकुराइं, अहवा किं मम भोदीए समं विवादेण, एसो दे बम्हणो पादेसु पडदि (३६)। इति पादयोः पतितुमिच्छति।

चेटी। एकान्ये निवार्य। मा कदु एव्वं करेदु अज्जो. सेहरअ! ओसर,ओसर, बम्हणो कदु एसो। विदूषकस्य पादयोः पतति। अज्ज! ण तुए कुविदव्वं, सम्बन्धिकानुरूवो कदु एसो मए परिहासो कदो (३७)।

(३२) शेखरक! ब्राह्मणः खल्वहम्।

(३३) यदि त्वं ब्राह्मणः। तत् क्व ते नवसूत्रम्?

(३४) तत् खलनेन चेटेन कष्ठीयमानं छिन्नम्।

(३५) यद्येवम्, तर्हि वेदाचारादपि कस्मिंश्चिदुदाहर।

(३६) भवति! अनेन शोधुगन्धेन क्व वेदाचारेण, अथवा किं मम भवत्या सह विवादेन, एष ते ब्राह्मणः पादेषु पतति।

(३७) मा खल्वेवं कार्योत्कर्षः, शेखरक! अपसर अपसर, ब्राह्मणः खल्वेषः, आर्ये! न त्वया कोपितव्यम्, सम्बन्धिकानुरूपः खल्वेष मया परिहासः कृतः।

(ज) नवसूत्रं नवीनं यज्ञसूत्रमित्यर्थः।

विदू०। अहम्मि णं पसाएमि। (पादयोर्निपत्य) मरिसेदु मरिसेदु अय्यो, जं मए मदपरव्वसेण सवरं, जेण अहं णीमालिआए सह आवासअं गमिस्सं (३८)।

विदू०। मरिसिदं मए, गच्छ तुम्हे, अहम्मि पियवयस्सं पेक्खामि (३९)।

निष्क्रान्तौ विटचेट्यौ सह चेटेन।

विदू०। अदिक्कन्तो वम्हणस्स अक्कात्तमितु, ता जाव अहम्मि मत्तवालअसङ्कदूसिदं इह दिग्घिकाए ण्हाइस्सं। तथा करोति। नेपथ्याभिमुखमवलोक्य। एसो पियवयस्सोवि रुक्मिणीं विअ हरी मलयवदीं अवलम्बिअ इदो एव्व आअच्छदि, ता जाव पासपरिवत्ती होमि (४०)।

ततः प्रविशति परिगृहीतवरनेपथ्यो नायको मलयवती विभवतश्च परिवारः।

नायकः। मलयवतीमवलोकयन् सहर्षम्।

दृष्ट्वा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवर्त्य तिष्ठति बलादालिङ्गिता वेपते।

(३८) अहमस्मि। प्रसादयामि, मर्षयत्वार्य:, यन्मया मदपरवशेनापराद्धम्, येनाहं नवमालिकया सह आवासं गमिष्यामि।

(३९) मर्षितं मया। गच्छत यूयम्। अहमपि प्रियवयस्यं प्रेक्षे।

(४०) व्यतिक्रान्तो ब्राह्मणस्योत्कालमल्पः। तद्यावदहमपि मत्तबालकसङ्कदूषितं इह दीर्घिकायां स्नास्यामि। एष प्रियवयस्योऽपि रुक्मिणीमिव हरिर्मलयवतीमवलम्ब्य इत एवागच्छति। तद्यावत् पार्श्वपरिवर्त्तिनी भवामि।

(अ) दृष्ट्वेति। अद्य नवोढा नवपरिणीता प्रिया वामतया

निर्यान्तीषु सखीषु वासभवनाबिर्गन्तुमेवेहते
याता वामतयैव मेऽद्य सुतरां प्रीत्यै नवोढ़ा प्रिया ॥२५॥(ञ)

अनयवतीं पश्यन् । प्रिये मलयवति !

हुङ्कारं ददता मया प्रतिवचो यन्नोनमासेवितं
यद्दाशानलदीपिभिस्तनुरियं चन्द्रातपैः स्नापिता ।
ध्यातं यत् सुचिरान्यनन्यमनसा नक्तान्दिनानि प्रिये !
तस्यैतत् तपसः फलं सुखमिदं पश्यामि यत्तेऽधुना ॥२६॥(ट)

प्रतिकूलतयैव मे मम सुतराम् अत्यर्थं प्रीत्यै जाता अतिप्रीतिकरी भूतेत्यर्थः तथाहि इदं अनयावलोकिता सखी अवोदृष्टिं ददाति, आमन्त्रिता आलपिता सखी न आलापं करोति, शय्यायां परिवृत्य तिष्ठति, बलात् बलमाश्रित्येत्यर्थः आलिङ्गिता सखी वेपते कम्पते, सखीषु वासभवनात् निर्यान्तीषु निर्गच्छन्तीषु सतीषु निर्गन्तुमेव ईहते चेष्टते इत्थं प्रतिकूलवर्तिनी अपि मम प्रीतिं वितनोतीति निष्कर्षः । शार्दूलविक्रीडितं वृत्तम् ।

(ञ) हुङ्कारमिति । हे प्रिये ! मया हुङ्कारं प्रतिवचः ददता यत् मौनं वाक्यस्य दानं अनादरः तेनेत्यर्थः अनुचितं दाशानलस्येव दीप्तिर्येषां अनुष्णत्वादिति भावः तैः चन्द्रातपैः चन्द्रकिरणैः यत् इयं तनुः स्नापिता अभिषिक्ता, तथा अनन्यमनसा अन्येभ्यो विषयेभ्यो निर्वर्तितचित्तेन मया हुङ्कारे नक्तान्दिनानि व्याप्येति शेषः यत् ध्यातं चिन्तितं मौनालम्बनं नियतश्वासं ध्यानञ्च तपसोऽङ्गं मया च तत्प्राप्त्याशया तत्रातिचलतापि केनापि महालापवर्जनात् नितरामावश्यके व्यापारे हुङ्कारेणैव प्रतिवचोदानात् चन्द्रकिरणानामग्नितुल्यत्वात् तत्सेवनात् कृतातिचलनाच तपोऽनुष्ठितमिति भावः अधुना ते तव इदं सुखं पश्यामीति यत् एतत् तस्य पूर्वोक्तस्य तपसः फलम् । शार्दूलविक्रीडितं वृत्तम् ।

नायिका । अपसार्य । हञ्जे चतुरिए ! ण केवलं दंसणीओ, पियम्मि भणिदुं जाणादि ज्जेव (४१)।

चेटी । सिक्ख । अदिपक्खवादिणि सच्चकं ज्जेव एदं,(८) किं एत्थ पिअवअणं (४२)।

नायकः । चतुरिके ! आदेयय मार्गे कुसुमाकरोद्यानस्य ।

चेटी । एदु एदु भट्टा (४३)।

नायकः । परिक्रम्य नायिकां निर्दिश्य । खेदं खेदमागच्छतु भवती ।

खेदाय स्तनभार एव किमु ते मध्यस्य हारोऽपरः
आस्यालुकयुग नितम्बभरतः काञ्चीगुणो किं पुनः ।
शक्तिः पादयुगस्य नूपुरयुगं वोढुं कुतो नूपुरौ
खाङ्गैरेव विभूषितासि वहसि क्लेशाय किं मण्डनम् ॥३७॥
(ङ)

(४१) हञ्जे ! चतुरिके ! न केवलं दर्शनीयः प्रियमपि भणितुं जानात्येव ।

(४२) अतिपक्षपातिनि सत्यकमेतत् । किमत्र प्रियवचनम् ।

(४३) एतु एतु भर्ता ।

(८) अतिपक्षपातिनि सत्यानुरागिणि । सत्यकमेतत् एतत् खलेन यदुक्तं स्वदर्थं तपः कृतमिति तत् सत्यमेवेत्यर्थः ।

(ङ) खेदायेति । हे प्रिये ! स्तनभारस्तनयोर्विस्तार एव ते तव मध्यस्य मध्यभागस्य खेदाय श्रमाय भवतीति शेषः अपरः हारः तदुपरीति शेषः किंतु, अधिकखेदाय भवतीति किं वक्तव्य इति

चेटी। एदं खु तं कुसुमाकरुज्जाणं, ता पविसदु भट्टा (४४)।

सर्वे प्रविशन्ति।

मायवः। विलोक्य। अहो नु कुसुमाकरोद्यानस्य (ङ) परा श्रीः। इह हि—

निष्यन्दस्यन्दनानां गिरिरयति लतामण्डपं कुट्टिमानां
तारं धाराग्टहाणां ध्वनिमनुतनुते ताण्डवं नीलकण्ठः।
यन्त्रोन्मुक्तश्च वेगाद् गलति विटपिनां पूरयन्नालवालान्
आपातोत्पीड़हेलाहृतकुसुमरजःपिञ्जरोऽयं जलौघः ॥३७॥

(ट)

---

(४४) एतत् खलु तत् कुसुमाकरोद्यानम्। तत्प्रविशतु भर्त्री।

भावः; जङ्घयुगं नितम्बभरतः निस्तम्बातिभारात् त्रास्यति क्लास्यति, अनया काञ्च्या रशनया पुनः किम्? तदुपरि रशनातिक्लेशकरीति भावः। जङ्घयुगलं वोढुं पादयुगस्य चरणद्वयस्य न शक्तिः न सामर्थ्यं पूरितौ कृतः जङ्घाभारधारणात्तयोः पादयोः पुनर्नूपुरभारवहनातिक्लेशकरमिति भावः त्वं स्वाङ्गैः निजावयवैरेव विभूषितासि अलङ्कृतासि, वृथैवं अलङ्कारं क्लेशाय किमर्थं वहसि? शार्दूलविक्रीड़ितं वृत्तम्।

(ङ) परा भट्टिनी।

(ङ) निष्यन्द इति। चन्दनानां निष्यन्दः रसः कुट्टिमानां लतामण्डपं गिरिरयति शीतलयति, नीलकण्ठो मयूरः धाराग्टहाणां जलयन्त्रगृहाणां तारं मन्द्रात् ध्वनिम् अनुकृत्य इत्यर्थः मेघध्वनिमनुमायेति भावः ताण्डवं वृत्तं ताण्डवं नटनं नृत्तमित्यमरः। तनुते विस्तारयति। यन्त्रात् धारायन्त्रात् उन्मुक्तः निःसृतः अयं जलौघः जलराशिः वेगात् आपातेन निपतनेन यः उत्पीड़ः आघात इत्यर्थः तेन हेलया अनायासेन हृतानां पातितानां कुसुमानां

अपिच—

अमी गोतारम्भैर्मुखरितलतामण्डपभुवः
परागैः पुष्पाणां प्रकटपटवासव्यतिकराः।
पिबन्तः पर्याप्तं सह सहचरीभिर्मधुरसं
समन्तादापानोत्सवमनुभवन्तीव मधुपाः ॥ ३८ ॥ (ण)

विदू। उपसृत्य। जेदु जेदु भवं। सोत्थि भोदीए (४५)।

नायकः। वयस्य! चिराद्दृष्टोऽसि।

विदू। भो वयस्स! लद्धं एव्व आअदोम्हि। किं पुण विवाहमङ्गलमिलिदमिअविज्जाहराणं आपाणदंसणकोदूहलेण परिब्भमन्तो एत्तिअं वेलं चिट्ठिदोम्हि। ता तुमम्पि दाव पेक्ख (४६)।

---

(४५) जयतु जयतु भवान्। स्वस्ति भवत्यै।

(४६) भो वयस्य! लब्धेनागतोऽस्मि। किं पुनर्विवाहमङ्गलोपमिलितामृतविद्याधराणामापानदर्शनकौतूहलेन परिभ्रमन्नेतावतीं वेलां स्थितोऽस्मि। तत् त्वमपि तावत् प्रेक्षस्व।

रजोभिः परागैः पिञ्जरः रञ्जित इत्यर्थः मत्त विटपिनां तरूणाम् आलवालानि तत्स्थितजलाधारवर्त्तुलाकारखातानि पर्यन्तं गलति पतति। सुबुद्धरायुक्तम्।

(ण) अमी इति। अमी मधुपाः मधुकराः गोतारम्भैः सुखरिताः शब्दिता लतामण्डपान्त्येव भुवः यैः तथोक्ताः, पुष्पाणां परागैः रजोभिः प्रकटः पटवासानां तदाख्य पटवासानां व्यतिकरः सम्पर्कः येषां तथाविधाः पटवासरञ्जिता इत्यर्थः सहचरीभिः मधुकरीभिः सह पर्याप्तं प्रभूतं मधुरसं पिबन्तः सन्तः समन्तात् आपानोत्सवम् अनुभवन्तीव। उत्प्रेक्षालङ्कारः। गिञ्जरिणीवृत्तं रसैरुद्रैश्छिन्ना यमनसभलागः गिञ्जरिणीति तल्लक्षणात्।

नायकः। एवं यथाह भवान्। समन्तादवलोकयन्।
वयस्य! पश्य पश्य—

स्निग्धाङ्गा हरिचन्दनेन दधतः सन्तानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृतांशूकाः।
सार्द्धं सिद्धजनैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनतरुच्छायासु विद्याधराः ॥४०॥ (त)

तदेहि वयमपि तां तमालवीथिं गच्छामः। परिक्रामति।

विदू। एसा क्खु तमालवीहिआ, एदं सच्चरन्तो दाव-परिखेडिदा विअ भोदी दीसइ, ता इह एव्व फलिहमणि-सिलाअले उपविसिअ वीसमम्ह (४७)।

नायकः। वयस्य! सम्यगुपलक्षितम्—

एतन्मुखं प्रियायाः शशिनं चिन्ता कपोलयोः कान्त्या।
तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम् ॥ ४१ ॥ (थ)

---

(४७) एषा खलु तमालवीथिका। एतां सञ्चरन्ती तावत् परि-खेदितेव भवती दृश्यते। तदिहैव स्फटिकमणिशिलातले उपविश्य विश्रामयामः।

(त) स्निग्धाङ्गा इति। अमी विद्याधरा हरिचन्दनेन स्निग्धं विलिप्तम् अङ्गं येषां तथोक्ताः सन्तानकानां देवतरुविशेषाणां स्रजो माल्यानि दधतः धारयन्तः तथा माणिक्याभरणानां प्रभाव्यतिकरैः प्रभापुञ्जैः चित्रीकृतानि रञ्जितानि अंशूकानि वस्त्राणि येषां तथाविधाः सन्तः चन्दनतरुच्छायासु सिद्धजनैः सार्द्धं मिश्रीभूय मिलित्वा दयितापीतावशिष्टानि मधूनि पिबन्ति। सार्द्धं सविलासं क्रीडितं इत्तम्।

(थ) एतदिति। एतत् प्रियाया मुखं कपोलयोः कान्त्या प्रभया

नायिकां दृष्ट्वा सहर्षम्। प्रिये! इहोपविशाम:।

नायिका। जं अज्जउत्तो आणवेदि (४८)।

सर्वे उपविशन्ति।

नायक:। नायिकाया मुखसदृशमन्यं पश्यन्। प्रिये! इदमेव त्वन्मुखाभि: कुसुमाकरोद्यानकुतूहलिभि: खेदिता। कुत:।

एतत्ते भ्रूलतोद्भासि पाटलाधरपल्लवम्।
सुखं नन्दनमुद्यानमतोऽन्यत् केवलं वनम् ॥४२॥ (ङ)

वेटी। सस्मितं विदूषकं निर्दिश्य। सुदं तुए भट्टिदारिअं कहं वण्णेदि। अज्ज उण अहं तुमं वण्णेमि (४९)।

विदू। सहर्षम्। भोदि! जीविदोम्हि। ता करेदु भोदी पमाद। जेण एसो अ मे पुणोवि ण भणादि। सहा तुमं ईदिसी। तादिसो कविलमंकडापारोत्ति (५०)।

---

(४८) यदार्य पुत्र आज्ञापयति।

(४९) श्रुतं त्वया भर्तृदारिकां कथं वर्णयति, अद्य पुनरहं त्वां वर्णयामि।

(५०) भवति जीवितोऽस्मि तत् करोतु भवती प्रमादम्। येनैष

विशदयति यत: शशिनं चन्द्रं जित्वा निर्जित्य क [illegible] तापेन सूर्यातपेन अनुरक्तं यत् कमलं जेतुम् ईहते चेष्टते ध्रुवं मन्ये, मन्ये यद्ध ध्रुवं प्रायो नूनमित्येवमादय इति ध्रुवं चन्द्रस्य सदृशेत्याद्यध्यवसायकत्वात् उत्प्रेक्षालङ्कार:। व्याख्यातम्।

(ङ) एतदिति। भ्रुवौ एव लते ताभ्याम् उद्भासि शोभमानं पाटलः रक्तः अधर एव पल्लवः यत्र तादृशं सुखं नन्दयतीति नन्दनं तदाख्यम् उद्यानं देवोद्यानमित्यर्थः अतः अस्मात् तव सदृशदर्शनात् अन्यत् उद्यानं केवलं वनम्।

(च) एष: विट इति भाव:।

चेटी। अज्ज! तुमं मए विवाहजागरणे णिद्दायमाणणिमीलिअच्छो सोहणो दिट्ठो। ता तह एव्व चिट्ठ जेण वण्णेमि (५१)।

विदू। तथा करोति।

चेटी। स्वगतम्। जाव एसो णिमीलिअच्छो चिट्ठदि, ताव णीलरसाणुआरिणा तमालपल्लवरसेण मुहं कालीकरइस्सं (५२)। उत्थाय तमालपल्लवं निर्भिद्य विदूषकस्य मुखं कालीकरोति।

नायको नायिका च विदूषकं पश्यतः।

नायकः। वयस्य! धन्यः खल्वसि, योऽस्मासु तिष्ठत्सु भवानेवं वर्ण्यते।

नायिका। नायकस्य मुखं दृष्ट्वा स्मितं करोति।

नायकः। नायिकामुखं दृष्ट्वा।

स्मितपुष्पोद्गमोऽयन्ते दृश्यतेऽधरपल्लवे।
फलं त्वन्यत्र मुग्धाक्षि! चक्षुषोर्मम पश्यतः॥४३॥ (न)

मां पुनरपि न भणति। यथा त्वमीदृशः। तादृशः कपिलमर्कटाकार इति।

(५१) आर्ये! त्वं मया विवाहजागरणे निद्रायमाणनिमीलिताक्षः शोभनो दृष्टः। तत्तथैव तिष्ठ येन वर्णयामि।

(५२) यावदेष निमीलिताक्षास्तिष्ठति। तावन्नीलरसानुकारिणा तमालपल्लवरसेन मुखं कालीकरिष्यामि।

(न) स्मितेति। हे मुग्धाक्षि! हे सुलोचने! ते तव अधर एव पल्लवः नवकिसलयः तत्र स्मितमेव पुष्पं तस्य उद्गमः उदयः, अन्यत्र तु पश्यतो मम चक्षुषोः फलं दृश्यते, यत्र पुष्पोद्गमस्तत्रैव फलोत्पत्तिरिति

विदू । भोदि ! किं तए किदं ? (५३) ।

बेटी । णं वण्णिओसि (५४) ।

विदू । हञ्चेन सुखं प्रहत्य इदा मरोषं दण्डकाष्ठमुद्यम्य ।

आः दासीए धीए ! राअउलं क्खु एदं । किं तव कारिस्सं । नायकं निर्दिश्य । भो तुम्हाणं पुरदो अहं दासीए धीआए खलीकदो । ता किं मम इह ट्ठिदेण । अण्णदो गमिस्सं (५५) ।

निष्क्रामति ।

चेटी । कुविदो मे अज्जअत्तेओ, जाव णं गदुअ प्रसादइस्सं (५६) ।

नायिका । हञ्चे चदुरिए ! किं मं एआइणिं उज्झिअ गच्छसि ? (५७) ।

चेटी । नायकं निर्दिश्य सस्मितम् । एव्वं एआइणी चिरं होहि (५८) ।

इति निष्क्रान्ता ।

---

(५३) भवति ! किं त्वया कृतम् ?

(५४) ननु वर्णितोऽसि ।

(५५) आः दास्याः पुत्रि ! राजकुलं खल्वेतत् । किं तव करिष्यामि । भो युवयोः पुरतोऽहं दास्याः पुत्र्या खलीकृतम् । तत् किं ममेह स्थितेन । अन्यतो गमिष्यामि ।

(५६) कुपितो मे आर्यपुत्रः, यावदेनं गत्वा प्रसादयिष्यामि ।

(५७) हञ्चे चतुरिके ! किं मामेकाकिनीं उज्झित्वा गच्छसि ? ।

(५८) एवमेकाकिनी चिरं भव ।

प्रसिद्धिः, दृष्टन्तु विपरीतं तवाधरे स्थितपुष्पं मम चक्षुषि तु तद्दर्शन-जनितानन्दरूपं फलमिति भावः ।

नायकः। नायिकाया मुखं पश्यन्।

दिनकरकरैर्मृष्टं बिभ्रत् द्युतिं परिपाटलां
दशनकिरणैः संसर्पद्भिः स्फुटीकृतकेसरम्।
यदि मुखमिदं मुग्धे! सत्यं समं कमलेन ते
मधु मधुलिहः किन्नैतस्मिन् पिबन् प्रविभाव्यते ॥४४॥ (प)

नायिका। विहस्य मुखमन्यतो नयति।

नायकः। तदेव पठति।

प्रविश्य पटाक्षेपेण (फ)।

चेटी। उपसृत्य। एसो कु अज्जमित्तावसू कज्जेण केणवि कुमारअं पेक्खिदुमिच्छदि (५९)।

नायकः। प्रिये! गच्छ त्वमात्मनो गृहम्, अहमपि मित्रावसुं दृष्ट्वा त्वरितमागत एव।

नायिका। चेट्या सह निष्क्रान्ता।

---

(५९) एष खल्वार्यमित्रावसुः कार्येण केनापि कुमारं प्रेक्षितुमिच्छति।

(प) दिनकरकरैरिति। हे मुग्धे! सुन्दरि! यदि इदं ते तव मुखं दिनकरस्य सूर्यस्य करैः किरणैः मृष्टं स्पृष्टम् अतएव परिपाटलां परितो रक्तां द्युतिं कान्तिं बिभ्रत् दधत् तथा संसर्पद्भिः प्रसरद्भिः दशनानां दन्तानां किरणैः स्फुटीकृताः व्यक्तीकृताः केसराः किञ्जल्काः यस्य तथोक्तम् अतएव सत्यं कमलेन समं ह्यस्ति इति शेषः तदा मधुलिहः भ्रमरः एतस्मिन् तव मुखकमले मधु पिबन् किं कथं न प्रविभाव्यते न लक्ष्यते? मधुकरस्यात्र मधुपानं युक्तमिति भावः। रूपणीयोत्तमम्।

(फ) पटाक्षेपेण पटस्य जवनिकायाः आक्षेपेण अपसारणेन।

ततः प्रविशति मित्रावसुः ।

मित्रा । अनिहत्य तं सपत्नं कथमिव जीमूतवाहनस्याहम् ।
कथयिष्यामि हृतं तव राज्यं रिपुणेति निर्लज्जः ॥४५॥(ब)
अनिवेद्य च न युक्तं गन्तुमिति निवेद्य गच्छामि, कुमार ! मित्रावसुः प्रणमति ।

नायकः । मित्रावसुं दृष्ट्वा । मित्रावसो ! इत आस्यताम् ।

मित्रा । निरूप्य उपविशति ।

नायकः । निरूप्य । मित्रावसो ! संरब्ध इव लक्ष्यसे ? (भ)

मित्रा । कः खलु मत्कृतके संरम्भः ? (म) ।

नायकः । किं कृतं मत्कृते न ? ।

मित्रा । स्वनाशाय किल युष्मदीयं राज्यमाक्रान्तम् ।

नायकः । सहर्षमाकाशगतम् । अपि नाम सत्यमेतत् स्यात् ? ।

मित्रा । अतस्तदुच्छित्तये आज्ञां दातुमर्हति कुमारः । किं बहुना—

(ब) अनिहत्येति । अस्य जीमूतवाहनस्य तं सपत्नं शत्रुम् अनिहत्य अविनाश्य निर्लज्जः सन् रिपुणा तव राज्यं हृतमिति कथमिव कथयिष्यामि ? एतत्कथने मम लज्जा भवतीति भावः ।

(भ) संरब्ध इव सम्भ्रान्त इव संक्रुद्ध इव वा संरम्भः सम्भ्रमे कोपे इत्यमरः ।

(म) कः खलु मत्कृतके संरम्भ इति मत्कृतकं हन्तुं संरम्भः कः ? विना संरम्भेणैव तं हनिष्यामीति भावः ।

संसर्पद्भिः समन्तात् क्षतसकलवियच्चध्वयानैर्विमानैः
कुर्व्वाणाः प्रावृषेव स्थगितरविरुचः श्यामतां वासरस्य।
एते यातास्त्वदस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धस्त्रीदृत्तयत्नक्षणभयविनमद्राजकं ते स्वराज्यम्॥४६॥ (य)

अथवा, किं बलौघैः—

एकाकिनापि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण।
आरादिपत्य हरिणेव मतङ्गजेन्द्रम्
याजौ मतङ्गहतकं हतमेव विद्धि॥ ४७॥ (र)

(य) संसर्पद्भिरिति। एते सिद्धाः तव वचनं प्राप्य समन्तात् संसर्पद्भिः सञ्चरद्भिः क्षतसकलेषु वियत्सु अन्तरिक्षेषु मध्ये यानं सञ्चारो येषां तथाभूतैः विमानैः देवयानैः प्रावृषेव वर्षाऋतुनेव स्थगिताः तिरोहिताः रवेः सूर्यस्य रुचो यत्र तादृशस्य वासरस्य दिवसस्य श्यामतां कृष्णतां सन्तः सद्यः झटिति इतः अस्मात् पटेगात् युद्धाय यातः, उद्भटनेभ्यः उपस्थितेभ्यः शत्रुभ्यः यत् क्षणभयम् अल्पकालके भयं तेन विनमत् आभीत राजकं राजसमूहो यस्मिन् तथाभूतं ते तव स्वराज्यं सिद्धस्त्रीणां शत्रुहस्तात् उद्धृतत्वे अविलम्बेन भवितेति भावः। सम्भराढ्यम्।

(र) एकाकिनेति। मया एकाकिनैव निःसहायेनैव रभसेन वेगेन आकृष्टः यः निस्त्रिंशः खड्गस्य दीधितयः प्रभाः सटा इव जटा इव तासां भरेण ब्यूहेनैव भासुरः समुज्ज्वलः तेन सता हरिणा सिंहेन मतङ्गजेन्द्रं हस्तीन्द्रमिव याजौ युद्धे आरात् समीपे निपत्य मतङ्गहतकं हतमेव नाधिकमेव विद्धि आगच्छ। उपमालङ्कारः। वसन्ततिलकं वृत्तम्। श्लेषे वसन्ततिलकं तभजा जगौ गः इति तल्लक्षणात्।

नायकः। आत्मगतम् कर्णौ पिधाय। अहह! दारुणमभिहितम्, अथवा एवं तावत्। प्रकाशम्। मित्रावसो! कियदेतत्, बहुतरमपि बाहुशालिनि (ख) त्वयि सम्भाव्यते। किन्तु—

स्वशरीरमपि परार्थे यः खलु दद्यादयाचितः कृपया।
राज्यस्य कृते स कथं प्राणिवधक्रीड्यमनुमन्ये ॥४८॥ (ग)

अपिच। क्रीडान् विहाय मम गलबुद्धिरेव नान्यत्र। यदि त्वमस्मत्प्रियं कर्त्तुमीहसे, तदनुकम्प्यातामसौ क्रीडदासीकृतो राज्यस्य कृते राज्यस्य तपस्वी (घ)।

मित्रा। सामर्षम्। कथं नानुकम्पनीय (ङ) इष्टोऽस्माकमुपकारी कृपणश्च।

नायकः। स्वगतम्। अनिवार्यसंरम्भः (च) कोपाच्चित्तचेता न शक्यते निवर्त्तयितुम्, तदेवं तावत्। प्रकाशम् मित्रावसो! उत्तिष्ठ, अभ्यन्तरमेव प्रविशावः,

---

(ख) कियदेतत् अल्पमात्रमेतत्। बाहुशालिनि भुजशौर्योन्मत्ते।

(ग) स्वशरीरमिति। यः खलु अयाचितः अप्रार्थितोऽपि कृपया परार्थे स्वशरीरमपि दद्यात् राज्यस्य कृते स कथं प्राणिवधक्रीड्यं जीवहिंसानिष्ठुरतां कर्त्तुमिति शेषः अनुमन्ये ? कथमनुमोदनं करोमीत्यर्थः। आख्यातम्।

(घ) क्रीडानिति। क्रीड एव मम गलबुरिति भावः। ईदृशे चेष्टसे दुश्चरमीत्यर्थः, क्रीडदासीकृतः क्रीडपरतन्त्रः राज्यस्य कृते राज्यलाभार्थम्। तपस्वी पराकः।

(ङ) नानुकम्पनीय इति मोक्षगुप्तोक्तिः।

(च) अनिवार्य संरम्भः दुर्निवारकोपः।

तत्रैव तावत् त्वां बोधयिष्यामि, स्मर्यते परिषत्समक्षः,

तथाहि ।

निद्रामुद्रावबन्ध्यव्यतिकरमनिशं पद्मकोशादपास्यन्
आयापूरैककर्मप्रवणनिजकरप्राणितार्यषविश्वः ।
दृष्टः सिद्धैः प्रसक्तस्तुतिमुखरमुखैरुत्तमप्येष गच्छन्
एकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रसादः ॥४६

(इ)

इति निष्क्रान्ताः सर्वे ।

इति तृतीयोऽङ्कः ।

(इ) निद्रेति । पद्मकोशात् कमलमुकुलात् अनिशं सततं निद्रा व्यधिकामः स एव सुप्तावबन्ध्यः सङ्कोचास्यानंतस्य व्यतिकरं सम्बन्धम् व्यपास्यन् निराकुर्वन् तथा आयानां दिशां पूरः स्वतेजसा पूरणमेव एक मुख्यं कर्म यस्य लोकानां प्राणिनां तस्याः पूरः पूरणं सफलीकरण तदेव एकं कर्म इति यस्य तस्मिन् प्रवणः निरतैः निजकरैः स्वकिरणैः सहस्रैरिति यस्य प्राणितं जीवितम् अर्थो विश्वं जगत् येन तथाभूतः किञ्च अत्र सभायां प्रसक्ताभिः प्रस्तुताभिः स्तुतिभिः मुखराणि मुखानि यस्य तादृशैः सिद्धैः देवयोनिविशेषैः दृष्टः निरीक्षितः एषः एकः अद्वितीयः विवस्वान् सूर्यः श्लाघ्यः प्रशस्यः, यस्य सूर्यस्य प्रसादः उदयः प्रसक्तता च परेषां हितकरणाय सत्कृत्यानुष्ठानाय एव । यतो जगदुपकारायैव उदेति अतः श्लाघनीय इति निष्कर्षः । स्रग्धराछन्दः ।

अथ चतुर्थोऽङ्कः ।

ततः प्रविशति कञ्चुकी (क) स्कन्धोत्तरक्षौमयुगलः प्रतीहारश्च ।

कञ्चुकी । अन्तःपुराणां विहितव्यवस्थः
पदे पदे संस्खलितानि पश्यन् ।
जरातुरः सम्प्रति दण्डनीत्या
सर्वां नृपस्यानुकरोमि वृत्तिम् ॥५०॥ (ख)

प्रती । आर्य्य वसुभद्र ! क्व नु खलु भवान् प्रस्थितः ? ।

कञ्चुकी । आदिष्टोऽस्मि देव्या मित्रावसुजनन्या, कञ्चुकिन् ! दशरात्रं त्वया यावन्मलयवत्या जामातुश्च रक्षावासांसि नेतव्यानि, दुहिता च श्वशुरकुले वर्त्तते । जीमूतवाहनोऽपि युवराजेन सह समुद्रवेलां द्रष्टुमद्य गत इति

(क) कञ्चुकी अन्तःपुरचरो वृद्धो विप्रो गुणगणोन्नितः । मौक्ष्यार्थैकप्रवणः कञ्चुकीत्यभिधीयते इत्युत्पलक्षणः पुमान् ।

अन्तःपुराणामिति । जरातुरः जरया दार्ढ्येन आतुरः व्याप्तः कञ्चुकं अन्तःपुराणां विहिता कृता व्यवस्था येन तथाभूतः पदे पदे प्रतिपदविक्षेपं प्रतिविषयञ्च संस्खलितानि पदस्खलनानि अनवधानविजृम्भितानि च पश्यन् सम्प्रति दण्डनीत्या यष्टिव्यवहारेण दण्डविधायकनीतिमार्गेण च नृपस्य राज्ञः सर्वां वृत्तिम् आचारम् अनुकरोमि । उपजातिवृत्तम् । स्यादिन्द्रवज्रा यदि तौ जगौ ग इति उपेन्द्रवज्रा प्रथमे लघौ सेति । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति च तल्लक्षणात् । श्लेषानुप्राणित उपमालङ्कारः ।

श्रूयते, तत्र जाने, किं राजपुत्र्याः सकाशं गच्छामि, अथवा जानातुरिति।

प्रती। आर्ये! वरं राजपुत्र्याः सकाशं गन्तव्यम्, तत्र हि कदाचिदस्यां वेलायां जामाता स्वयमेवागतो भविष्यति।

कञ्चुकी। साधूक्तम् अथ भवान् पुनः क्व प्रस्थितः?।

प्रती। आदिष्टोऽस्मि महाराजविश्वावसुना, यथा भो सुनन्द! गच्छ शिवावसुं ब्रूहि, अस्मिन् दीपप्रतिपदुत्सवे (ग) मत्सुतया जामातुश्च यत् किञ्चित् प्रदीयते, तदुत्सवानुरूपं किञ्चिदागत्य चिन्त्यतामिति।

ततः प्रविशति जीमूतवाहनो मित्रावसुश्च।

नायकः।

शय्या शाद्वलमासनं शुचि शिला सङ्घ द्रुमाणामधः
पीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः।
इत्याराधितलभ्यसर्वविभवैर्दोषोऽयमेको वने
दुष्प्रापार्थिनि यत् परार्थघटनाबद्धव्यवस्था स्थीयते ॥५१॥

(घ)

(ग) दीपप्रतिपदुत्सवे दीपप्रतिपच्चाम कश्चित् उत्सवः दीपदानरूपानन्दजनकव्यापारविशेषः स च कस्यामपि प्रतिपदि तिथौ क्रियते अतस्तदुत्सवो दीपप्रतिपदिति कथ्यते। तत्र।

(घ) शय्येति। शाद्वलं नवहरितं शय्या शयनीयं शुचि शिला पवित्रं पाषाणम् आसनं द्रुमाणां वृक्षाणाम् अधः तलं सङ्घ आवासः, पीयते इति पानं पीतं पीतम् निर्झरवारि कन्दाः मूलविशेषाः अशनं भोज्यं वस्तु इत्यर्थः मृगाः सहायाः सहचराः इति इत्थम् आराधितः आयाचितः लभ्यः सर्वविभवः समस्तसम्पद् यस्मिन् तादृशे वने अयम्

मित्रा। अर्द्धमवलोक्य। कुमार! त्वर्यतां त्वर्यताम्, समयोऽयं चलितमम्बुराशेः।

नायकः। आश्चर्यम्। सम्यगुपलक्षितम्।

उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिताः।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायंस्तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमागच्छति॥१२॥ (ङ)

मित्रा। नन्वियमागतैव, पश्य।

कवलितलवङ्गपल्लवकरिमकरोद्गारिसुरभिणा पयसा।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति॥१३॥ (च)

यकः दोषः, यत् दुष्प्रापाः दुर्लभाः अर्थिनो यत्र तादृशे ऊर्यरक्षिते इत्यर्थः अन्यस्मिन् परार्थघटनायां परकार्यकरणे बन्धोः विफलेः परकार्यं मकर्वद्भिरित्यर्थः इयं स्त्रीयते विफलं क्रियते नीयते इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्।

(ङ) उन्मज्जदिति। उन्मज्जताम् उत्पततां जलकुञ्जरेन्द्राणां जलहस्तिनां रभसेन वेगेन यः आस्फालः जलोत्पाडनं तस्य अनुबन्धेन सातत्येन उद्धतः उत्कटतां नीतः, तथा सर्वाः पर्वतानां याः कन्दराः गुहाः तासाम् उदरभुवः अभ्यन्तरभागान् प्रतिध्वानिताः प्रतिध्वनियुताः प्रतिध्वानिनीरिति पाठे स एवार्थः। कुर्वन् अतएव श्रुतिपथोन्माथी कर्णविवरक्लेशी अयम् उच्चैः महान् ध्वनिः यथा उच्चरति उद्गच्छति, तथा प्रायः मन्ये प्रेङ्खद्भिः चलद्भिः असंख्यैः शङ्खैः धवला इयं वेला समुद्रजलराशेः आगच्छति उत्पतति। शार्दूलविक्रीडितं वृत्तम्।

(च) कवलितेति। एषा समुद्रवेला सागरतटी वेला क्षारक्षीरसोरयोरित्यमरः। कवलिताः भक्षिता लवङ्गपल्लवा यैः तादृशानि करिणो

नायकः। मित्रावसो! पश्य पश्य, शरत्समयपाण्डुभिः पयोदपटलैः प्रावृता: प्रालेयाचलशिखरश्रियमुद्वहन्त्येते मलयसानवः (छ)।

मित्रा। नैवामी मलयसानवः, नागानामस्थिसंघाताः (ज) खल्वमी।

नायकः। साधेगम्। कष्टम् किं निमित्तममी संघातमृत्यवो जाताः (झ)।

मित्रा। कुमार! नैवामी संघातमृत्यवः, श्रूयतां यथैतत्, दूरं किल स्वपक्षपवनापास्तसमस्तसागरतलपूरं रसातलादुद्धृत्य प्रतिदिनमेकैकं नागमाहारयति वैनतेयः (ञ)।

जलङ्कलितो मकरो जलजन्तुविशेषाश्च करिसमा मकरा वा तान् उद्गिरति उद्वमतीति तथोक्तम् अतएव सुरभि सुगन्धं तेन पयसा जलेनोपलक्षिता तथा रत्नानां सप्तदशभेदस्थितानां द्युतिभिः कान्तिभिः रञ्जिता सती भाति राजते। आर्याछन्दः।

(छ) शरत्समयपाण्डुभिः शरदागमशुभैः पयोदपटलैः मेघनिचयैः प्रावृता आच्छादिता अतएव प्रालेयाचलस्य हिमवतश्च शिखरश्रियं शृङ्गकान्तिम्। मलयसानवः मलयपर्वततटाः।

(ज) नागानां सर्पाणाम्।

(झ) अमी नागाः सङ्घातमृत्यवः सङ्घातेन संहत्या मृत्युर्येषां तथोक्ताः। युगपत् बहवो मृता इत्यर्थः।

(ञ) स्वपक्षेति। स्वस्य पक्षयोः पवनेन व्यपास्तः चालित ताडितः समस्तः सागरतलस्य पूरः प्रवाहो यस्मिन् तद् यथा तथा रसातलात् पाताळात्। आहारयति भक्षयति वैनतेयः विनतानन्दनो गरुड़ इत्यर्थः।

नायकः । मोहेनम् । कष्टमतिदुष्करं करोति, ततस्ततः ।

मित्रा । ततः सकलनागविनाशायाग्रहिणा वासुकिना गरुत्मान् अभिहितः ।

नायकः । सादरम् । किं मां प्रथमं भक्षयेति ?।

मित्रा । नहि नहि ।

नायकः । किमन्यत् ?।

मित्रा । इदमुक्तम्—त्वदभिपातसन्त्रासात् सहस्रशः स्रवन्ति भुजङ्गमानां गर्भाः, म्रियन्ते पञ्चत्वमुपयान्ति, एवञ्च सन्ततिविच्छेदोऽस्माकम्, तव चैवं स्वार्थहानिः (ट) तत् यदर्थमभिपतति भवान् नागलोकं तमिह नागमेकैकमनुदिनं प्रेषयामि ।

नायकः । कथं रक्षिता नागराजेन (ठ पक्षगाः ?।

जिह्वासहस्राहतयस्य मध्ये
नैकापि सा तस्य किमास्ति जिह्वा ।
एकाहिरक्षार्थमहिंहिंसयेऽद्य
दत्तो मयात्मेति यया ब्रवीति ॥५४॥ (ड)

(ट) त्वदभिपातसन्त्रासात् तव अभिपातः आपतनं तेन यः सन्त्रासः भयं तस्मात् । एवञ्च एवं सति सन्ततिविच्छेदः वंशलोपः । स्वार्थहानिः निजाहारव्याघातः ।

(ठ) नागराजेन वासुकिना ।

(ड) जिह्वेति । तस्य नागराजस्य जिह्वासहस्राहतयस्य सहस्रधिरक्षणात् जिह्वासहस्रं हिंजिह्वत्वाच्च तेदंहितयामिति बोध्यं मध्ये सा एकापि जिह्वा किं नास्ति ? यया जिह्वया गरुडः अहेः नागस्य रक्षार्थम् अद्य अहिंहिंसे नागलोके गरुत्मते मया ‘अहं दत्त’ इति ब्रवीति स इति शेषः । इन्द्रवज्राछन्दः ।

निभा । प्रतिपक्षं तत् (ठ) पक्षिराजेन –

इत्येष भोगिपतिना विहितव्यवस्थो
यान् भक्षयत्यहिपतीन् पतगाधिराजः ।
यास्यन्ति यान्ति च गताय दिने विपक्षं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥५५॥ (ड)

नायकः । आश्चर्यम् ! ! !

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥५६॥ (त)

अहो ! कष्टपर्य्यवसानेयं (थ) विपत्तिर्नागानाम् । आत्मगतम् । अपि शक्नुयामहं स्वशरीरसमर्पणेन एकस्य नागस्य प्राणपरित्राणं कर्त्तुम् ।

ततः प्रविशति प्रतीहारः ।

प्रती । आरूढोऽस्मि गिरिशिखरम्, यावन्निभालयामि-

(ठ) प्रतिपक्षं श्रोतृतं तत् नागराजरक्षनमित्यर्थः ।

(ड) इतीति । एष पतगाधिराजः इति इत्थं भोगिपतिना नागरक्षेण कृता व्यवस्था यस्य तथाविधः यान् अहिपतीन् नागेन्द्रान् भक्षयति, तेषां नागेन्द्राणाम् अमी तुहिनशैलरुचः हिमाचलप्रभाः अस्थिकूटा अस्थिनिचयाः दिने प्रतिदिनमित्यर्थः विपक्षं विपक्षेषु इति यास्यन्ति यान्ति गताय । वसन्ततिलकं वृत्तम् ।

(त) सर्वेति । मूढा निर्बुद्धयोऽज्ञा इत्यर्थः सर्वेषाम् अशुचीनाम् अमेध्यानां निधानस्य आश्रयस्य कृतघ्नस्य विनाशिनः क्षणध्वंसिनः शरीरकस्य क्षुद्रशरीरस्य अपि कृते निमित्तं पापानि कुर्वते आचरन्ति ।

(थ) अहो इति । खेदसूचकमव्ययम् । कष्टं पर्य्यवसानम् अन्तो यस्यास्तादृशी ।

न्विष्यामि । परिक्रम्य । अयं मित्रावसुर्जीमातुः समीपे तिष्ठति । उपसृत्य । विजयेतां कुमारौ ।

मित्रा । सुनन्द ! किं निमित्तमिहागमनम् ?।

प्रतीहारी । कर्णे कथयति ।

मित्रा । कुमार ! तातो मामाह्वयति ।

नायकः । गम्यताम् ।

मित्रा । कुमारेणापि बहुप्रत्यवायं (द) ऽस्मिन् प्रदेशे न चिरं स्थातव्यम् । इति निष्क्रान्तः ।

नायकः । यावदहमप्यस्मादिरिशिखरादवतीर्य समुद्रतटमवलोकयामि । परिक्रामति ।

नेपथ्ये । हा पुत्तअ सङ्खचूड ! कहं वाबादिअमाणो अज्ज किल तुमं मए पेक्खिदव्वो ? (१) !

नायकः । श्रुत्वा । अये । योषित इवार्त्तप्रलापः, कथं, कुतो वास्या भयमिति स्फुटीकरिष्ये । परिक्रामति ।

ततः प्रविशति रुदित्वा रुदत्या सुनन्दया गृह्यमाणः शङ्खचूडो गोपायितबन्धुयुगलश्च (ध) किशोरः ।

रुदती । सामि ! हा पुत्तअ सङ्खचूड ! हं वाबादिअमाणो अज्ज किल तुमं मए पेक्खिदव्वो । विलुठ्य स्थिता ।

---

(१) हा पुत्रक शङ्खचूड ! कथं व्यापाद्यमानोऽद्य किल त्वं मया प्रेक्षितव्यः ? ।

(द) बहुप्रत्यवायं बहुनिष्टकरं बहुपायजनकं वा ।

(ध) गोपायितेति । गोपायितं रक्षितं स्वीकृतमित्यर्थः बन्धुयुगलं येन तथोक्तः ।

इमिणा मुहचन्देण विरइअं दाणिं अन्धआरीभविस्सदि पादालं (२)।

गङ्गा। अम्ब! किमिति वैक्लव्येन? (न) सुतरां नः पीड़यसि।

इडा। निर्घृणे पुत्रच्छायानि मृगयन्ती। हा पुत्त! कहं दे अदिट्ठसूरकिरणं सूउमारसरीरं णिग्घिणिओ (प) गरुड़ो आहारइस्सदि (३)। कण्ठे गृहीत्वा रोदिति।

गङ्गा। अम्ब! अलं परिदेवितेन, पश्य।

क्रीड़ीकरोति प्रथमं यदा जातमनित्यता।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः? ॥५७॥ (फ)

गन्तुमिच्छति।

इडा। पुत्तअ! चिट्ठ मुहुत्तअं, जाव दे वअणं पेक्खामि ४)।

---

(२) हा पुत्रक गङ्गाचन्द्र! कथं व्याघादमानोऽद्य किल त्वं मया प्रेक्षितव्यः? अनेन मुखचन्द्रेण विरचितमिदानीमन्धकारीभविष्यति पातालम्।

(३) हा पुत्र! कथं ते अदृष्टसूर्यकिरणं सुकुमारशरीरं निर्घृणो गरुड आहारयिष्यति?।

(४) पुत्र! तिष्ठ मुहूर्तम्, यावत् ते वदनं प्रेक्षे।

(न) वैक्लव्येन कातरभावेन।

(प) निर्घृणः निर्दयः।

(फ) क्रीड़ीकरोतीति। अनित्यता विनश्वरत्वं धात्रीव उपमातेव यदा जातं जीवं प्रथमं क्रीड़ीकरोति, क्रीड़ां नयतीत्यर्थः पश्चात् जननी क्रीड़ीकरोतीत्यर्थः तदा शोकस्य क्रमः नियमः हेतुरिति यावत् कः? न कोऽपि शोकहेतुरित्यर्थः।

विदूरः। एहि कुमार सङ्खचूड! किं ते एदाए भणन्तीए, पुत्तसिणेहमोहिदा क्खु एसा, ण आणेदि लाअकज्जं? (५)।

शङ्ख। अयमागच्छामि।

विदूरः। आत्मगतम् अपतोऽवलोक्य। आणीदो क्खु एसो मए वज्झसिलासमीवे, ता वज्झचिण्हं दाइस्सं (६)।

नायकः। इयमसौ योषित्। शङ्खचूड इदा। नूनमनेनास्याः सुतेन भवितव्यम्, तत् किमाक्रन्दति?। सम्यगवलोक्य। न खल्वस्या भयकारणं किञ्चित् पश्यामि, कुतोऽस्या भयमिति, यावदुपसर्पामि, प्रसक्त एवायमेतेषामालापः, कदाचिदत एवास्याभिव्यक्तिः(ब)र्भविष्यति, तद्दिष्टयान्तरितस्तावच्छृणोमि।

विदूरः। साक्षं कृताञ्जलिः। कुमाल संखचूड एसो सामिणो आणेसीअत्ति करिअ ईदिसं णिट्ठुरं मन्तीअदि (७)।

शङ्ख। भद्र! कथय (भ)।

---

(५) एहि कुमार शङ्खचूड! किं ते एतया भणन्त्या, पुत्रस्नेहमोहिता खल्वेषा, न जानाति राजकार्यम्?

(६) आनीतः खल्वेष मया वध्यशिलासमीपे, तत् वध्यचिह्नं दास्यामि।

(७) कुमार शङ्खचूड! एष स्वामिन आनीत इति कृत्वा ईदृशं निष्ठुरं मन्त्र्यते।

(ब) प्रसक्त एव चलित एव। अभिव्यक्तिः प्रकाशः।

(भ) मन्त्र्यते कथ्यते।

किङ्करः। नागराजो वासुकिः आज्ञापयति (८)।

गरुड़। शिरस्यञ्जलिं बद्ध्वा सादरम्। किमाज्ञापयति देवः?।

किङ्करः। एदं रत्तंसुअ जुअलं परिहिअ आरुह वज्झसिलं, जेण रत्तंसुअं उवलक्खिअ गलुड़ो आहारइस्सदित्ति (९)।

नायकः। श्रुत्वा। कथमसौ वासुकिना परित्यक्तः?।

किङ्करः। कुमाल! गेण्ह एदं वसणजुअलं। (१०) इत्यर्पयति।

गरुड़। सादरम्। उपनय। स्पृष्ट्वा। शिरसि साम्यादेयः।

शङ्खः। पुत्रस्य कृते वाससी दृष्ट्वा, सोरस्ताड़म्। हा वच्छ! एदं खु वज्जपाड़सरिसं सम्भावीअदि (११)। मोहं गतः।

किङ्करः। आसण्णा गलुअस्स आअमणवेला, ता लहुं गच्छामि (१२)। इति निष्क्रान्तः।

गरुड़। अम्ब! समाश्वसिहि।

शङ्खः। समाश्वस्य साक्षम्। हा पुत्तक! हा मणोरह सअलह! कहिं पुणो तुमं पेक्खिस्सं (१३)। रुदति।

---

(८) नागराजो वासुकिः आज्ञापयति।

(९) इदं रक्तांशुकयुगलं परिधाय आरोह वध्यशिलाम्। येन रक्तांशुकसमूहेन गरुड़ आहारयिष्यतीति।

(१०) कुमार! गृहाणैतत् वसनयुगलम्।

(११) हा वत्स! इदं खलु वज्रपातसदृशं सम्भाव्यते।

(१२) आसन्ना गरुड़स्यागमनवेला, तत्रहं गच्छामि।

(१३) हा पुत्रक! हा मनोरथशतस्य! क्व पुनस्त्वां प्रेक्षिष्ये?

नायकः। अहो! नैर्घृण्यं (म)। गरुडस्य अपि च—

मूढाया मुहुरम्बसन्ततिमुचः कृत्वा प्रलापान् बहून्
कस्मात तव पुत्रकेति कृपणं दिक्षु क्षिपन्त्या दृशम्।
अङ्के मातुरवस्थितं विशसिमं त्यक्त्वा घृणामग्रतः
चञ्चुप्रेण खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ॥५८॥ (य)

शङ्ख। आत्मनोऽपि निवारयन्। अम्ब! किमतिवैक्लव्येन? ननु समाश्वसिहि।

इडा। सखि! कह समस्सासिम्मं, किं एकपुत्तकोत्ति कदुअ साणुकम्पेण णाअराएण पेसिदोसि, हा कहं अविच्छिण्णे जीवलोए मम पुत्तओ सुमरिदो (र) सव्वधा अहं म्हि मन्दभग्गा (१४) इति।

---

(१४) कथं समाश्वसिमि इति? किमेकपुत्रक इति कृत्वा सानुकम्पेन नागराजेन प्रेषितोऽसि? हा कथमविच्छिन्ने जीवलोके मम पुत्रकः स्मृतः। सर्वथाहमस्मि मन्दभाग्या।

(य) नैर्घृण्यं निर्दयत्वम्।

(र) मूढाया इति। मूढाया मोहं गतायाः। वक्षे केनेति शेषः। मुहुः पुनः पुनः। बहून् प्रलापान् कृत्वा अम्बुसन्ततिमुचः अश्रूणि त्यजन्त्या दृशा। हे पुत्रक! कः तेऽस्य लोकस्य रञ्जितः इति कृपणं दीनं यथा स्यात्तथा दिक्षु क्षणं भ्रमन्त्या दृशा मातुः, अङ्के क्रोडे अवस्थितम्, अतएव विश्रब्धं घृणां दयां त्यक्त्वा चञ्चुप्रेण अग्रतः भक्षयतः खगाधिपस्य गरुडस्य हृदयं वज्रेण कृत निर्मितं मन्ये तर्कयामि। शार्दूलविक्रीडितं छन्दः।

(र) एकपुत्रक इति। एक एव पुत्रकत्वं ममेति कृत्वा विविध्य कारुण्येन दयावता नागराजेन कथं प्रेषितोऽसि, तव प्रेषणं

नायकः। सकरुणम्।

आर्त्तं कण्ठगतप्राणं परित्यक्तं स्वबन्धुभिः।
त्रायेऽनेनं यदि ततः कः शरीरेण मे गुणः? ॥५८॥ (ल)

तद् यावदुपसर्पामि।

शङ्ख। अम्ब! संस्तम्भयात्मानम् (व)।

शङ्खा। हा पुत्तअ! जदा णाअलोअपरिरक्खणेण वासुइणा परिच्चत्तोमि, तदा को दे अवरो परित्ताणं करिस्सदि? (१५)।

नायकः। उपसृत्य। नन्वहमहम्।

शङ्खा। णायकं दट्ठा मणसा अमुत्तरीएण पुत्तकमाच्छाद्य नायकसमक्षत्वं जानुभ्यां स्थित्वा। विणदाणन्दण! वावादेहि मं अहं दे णाअराएण आहारणिमित्तं परिकप्पिदा (१६)।

नायकः। साक्रम्। अहो! पुत्रवात्सल्यम्!!!

---

(१५) हा पुत्रक! यदा नागलोकपरिरक्षणेन वासुकिना परित्यक्तोऽस्मि, तदा कस्ते अपरः परित्राणं करिष्यति?

(१६) विनतानन्दन! व्यापादय माम्, अहं ते नागराजेनाहारनिमित्तं परिकल्पिता।

तादृशस्य दयालोर्न युक्तमिति भावः। अविच्छिन्ने विच्छेदरहिते लोकलोके संसारे। सूतः नागराजेनेति शेषः। त्रायेऽनेनेत्यत्रेक्षेरियम्।

(ल) आर्त्तमिति। यदि आर्त्तं कातरं कण्ठगतप्राणं स्वबन्धुभिः परित्यक्तम् एनं न त्रायेय न रक्षामि, ततस्तदा मे शरीरेण को गुणः किं प्रयोजनम्? न कोऽपीत्यर्थः।

(व) संस्तम्भय स्थिरीकुरु।

अम्बा विलोक्य मन्ये पुत्रस्नेहेन विह्वलत्वमिदम् ।
अकरुणहृदयः करुणां करिष्यति भुजङ्गमपतिरपि ॥६०॥ (ग)

शङ्ख । अम्ब ! अलं त्रासेन, न नागमातुः, पश्य—

महाहिमस्तिष्कविभेदमुक्त-
रक्तच्छटाचर्चितचण्डचक्षुः ।
क्वासौ गरुत्मान् क्व च नाम सौम्य-
स्वभावरूपाकृतिरेष साधुः ॥६१॥ (घ)

इडा । अहं क्व तुज्झ मरणभीआ सव्वं एव्व लोअं गरुडमअं पेक्खामि (१७) ।

कादक्रः । अम्ब ! किं पुनःपुनरभिहितेन ? ननु कर्मणैव सम्पादयामि (ङ) ।

इडा । चिरञ्जीवं वहू । पुत्तअ ! चिरं जीव (१८) ।

(१७) अहं खलु तव मरणभीता सर्वमेव लोकं गरुडमयं प्रेक्षे ।
(१८) पुत्रक ! चिरं जीव ।

(ग) अम्बा इति । अम्बाः नागमातुः पुत्रस्नेहेन इदं विह्वलत्वं कातरत्वं विलोक्य अकरुणहृदयः निर्दयात्मा भुजङ्गानां पतिः गरुडोऽपि करुणां करिष्यति, मन्ये सम्भावयामि । आर्यावृत्तम् ।

(घ) महेति । महतां अहीनां नागानां मस्तिष्कस्य गरिष्ठतरशकारवस्तुनः विभेदात् मुक्ताभिर्निर्गलिताभिः रक्तच्छटाभिः रुधिरधाराभिः चर्चिते रञ्जिते रक्तीकृते इत्यर्थः चण्डे भीषणे चक्षुषी यस्य तादृशः असौ गरुत्मान् क्व ? सौम्याः स्वभावा रूपाणि आकृतयश्च यस्य तादृशः एषः साधुश्च क्व ? नामेति सम्भावनायाम् अस्य गरुडत्वमङ्गीकृत्यापि न सम्भाव्यते इत्यर्थः । उपजातिवृत्तम् ।

(ङ) कर्मणैव कार्येणैव । सम्पादयामि करोमि परित्राणमिति शेषः ।

नायकः। ममैतदस्यार्पय बन्धविष्कं
प्राङ्गत्य यावद्दिनतालजाय।
पुत्रस्य ते जीवितरक्षणाय
खटेऽमाहारयितुं दृढामि॥ ६२॥ (इ)

दृढा। कर्णौ पिधाय। पडिहदं क्खु एदं, तुमम्मि सङ्खचूडणिव्विसेसो पुत्तो, अहवा सङ्खचूडादोवि अहिअयरो. जो एव्वं बन्धुजणपरिच्चत्तं वि पुत्तकं मे सरीरप्पदाणेण रक्खिदुमिच्छसि (१९)।

शङ्खु। अही!! अगहिपरीतमस्य महासत्त्वस्य (च) चेतः, कुतः।

विश्वामित्रः श्वमांसं श्वपच इव पुराभक्षयद् यद्विमित्तं
नाडीजङ्घो निजघ्ने क्रतसदुपक्रतिर्यत्कृते गौतमेन।

(१९) प्रतिहतं खल्वेतत्. त्वमपि शङ्खचूडनिर्विशेषः पुत्रः, अथवा शङ्खचूडादप्यधिकतरं, य एवं बन्धुजनपरित्यक्तमपि पुत्रकं मे शरीरप्रदानेन रक्षितुमिच्छसि।

(इ) ममेति। हे आर्य! मातः! यतत् बन्धविष्कं रज्जयुगलमिति भावः मम अर्पय देहि, यावत् त्वमेतत्पुत्रः प्राङ्गत्य आत्मानमिति शेषः ते तव पुत्रस्य जीवितरक्षणाय दिनतालजाय गरुडाय खटेऽस्मान् आहारयितुं भक्षयितुं दृढामि। उपजातिश्छन्दः।

(च) महासत्त्वस्य महाप्राणिनः महोत्साहस्य वा।

(छ) विश्वामित्र इति। विश्वामित्रः पुरा पूर्वस्मिन् काले श्वपच इव चाण्डाल इव यद्विमित्तं येषां प्राणानां रक्षणार्थमित्यर्थः श्वमांसं कुक्कुरजघनमांसमित्यर्थः अभक्षयत्, तदुक्तं महता, सुधार्त्तः खलु मध्याह्ने विश्वामित्रः श्वजाघनीम्। चाण्डालकृताहारात्

पुत्रोऽयं कश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेष साधुस्तृणमिव कृपया यः परार्थे ददाति ॥६३॥

(क)

नायकसादृश्य। भो महासत्त्व! त्वया दर्शिता एव आत्म-प्रदानव्यवसायनिर्व्याजा मयि कृपालुता, तदलमनेन निर्बन्धेन (ख) पश्य।

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः।
परार्थे बद्धकक्षाणां त्वादृगामुद्भवः कुतः? ॥६४॥ (ग)

तत् किमनेन निर्बन्धेन मुच्यतामयमध्यवसायः (घ)।

नायकः। शङ्खचूड! न मे चिराल्लब्धावसरस्य अस्य

धर्माधर्मविचक्षण इति। गौतमेन मुनिना कृता तस्य गौतमस्य उपकृतिरुपकारो येन तथोक्तो गौडेन्द्रः तदाख्यो मुनिविशेषः यत्कृते येषां प्राणानां कृते रक्षणार्थमित्यर्थः निजप्रिये निष्कृतः। अथ कश्यपस्य पत्नः तार्क्ष्यः गरुडात् यदर्थं येषां प्राणानां रक्षणार्थं प्रतिदिनम् उरगान् नागान् अत्ति भक्षयति, य एष जीमूतवाहनः परार्थे परप्राणरक्षणार्थं कृपया तान् प्राणान् तृणमिव ददाति। खण्डराद्वृत्तम्।

(ख) आत्मेति। आत्मनः स्वदेहस्य प्रदाने यो व्यवसायः उद्योगः तेन निर्व्याजा अकपटा। निर्बन्धेन आग्रहेण।

(ग) जायन्ते इति। मादृशाः मादृगाः क्षुद्रजन्तवः नीचप्राणिनः जायन्ते च उत्पद्यन्ते च म्रियन्ते पञ्चत्वमायान्ति च, परार्थे परररक्षणार्थं बद्धकक्षाणां संयतकटीनां महात्मानामित्यर्थः त्वादृशां तत्सदृशानाम् उद्भवः कुतः? न कथमपि त्वादृशा उद्भवन्तीत्यर्थः।

(घ) अध्यवसायः उद्योगः।

परार्थसम्पादनामनोरथस्यान्तरायं कर्तुमर्हसि, तदलं विकल्पेन (ङ) दीयतामेतद् बध्यचिह्नम्।

शङ्ख। भो महासत्त्व! किमनेन वृथाऽऽयासेन? न खलु शङ्खधवलं शङ्खपालकुलं शङ्खवृद्धो मलिनीकरिष्यति, यदि ते वयमनुकम्पनीयाः, तदा इयमस्माद्विपत्तिविकलवा मा यथा जीवितं जह्यात् (च) तथाभ्युपायश्चिन्त्यताम्।

नायकः। किमत्र चिन्त्यते?।

म्रियते म्रियमाणे या त्वयि जीवति जीवति।
तां यदिच्छसि जीवन्तीं रक्षात्मानं ममासुभिः॥५६॥ (छ)

अयमभ्युपायः (ज) तदर्पय त्वरितं बध्यचिह्नम्, यावदनेनात्मानं प्रच्छाद्य बध्यशिलामारोहामि, त्वमपि जननीं पुरस्कृत्य अस्माद्देशाद्विवर्तस्व, कदाचिदम्बा आलोक्य घातस्थानं संविकृष्टं स्वाधमभावकातरत्वेन जीवितं जह्यात्.

(ङ) चिरात् दीर्घकालात् परमिति शेषः। बध्यावसरस्य प्राप्तकालस्य। परार्थेति परार्थस्य परकार्यस्य सम्पादनाया निर्वृत्तेर्यः मनोरथः अभिलाषः तस्य। अन्तराय विघ्नम्। विकल्पेन अन्यथा कल्पनेन।

(च) शङ्खपालेति। शङ्खपालस्य शङ्खवृद्धजनकस्य कुलम्। जह्यात् त्यजेत्।

(छ) म्रियते इति। या त्वयि म्रियमाणे म्रियते, त्वयि जीवति जीवति, तां तव मातरमित्यर्थः यदि जीवन्तीमिच्छसि, तदा मम असुभिः प्राणैः आत्मानं रक्ष।

(ज) अयमभ्युपायः तव मातुः प्राणरक्षणे इति शेषः।

किं न पश्यति भवानिदं विषयपवनानेकबहुशस्त्रसंकुलं (भ)
महाश्मशानम् ? तदाह,

चञ्चच्चञ्चपुटक्षतच्युतपिशितग्रासग्रहग्रहैः
गृध्रैरावद्धपक्षहतविधुतिभिर्बद्धसान्द्रान्धकारे ।
वल्गोद्दान्ताः पतत्त्रयः ग्रमितग्रिखिग्रिखाग्रेषवोऽस्मिन् ग्रिवानां
अस्रस्रोतस्यलस्रस्मृतिबहुलवसा वासविस्रे स्वनन्ति ॥६६॥(ग)

यद्ध । कथं न पश्यामि ? ।

प्रतिदिनमहिनाहारेण विनायकाहितप्रीति ।
अग्निधवलास्थिकपालं वपुरिव रौद्रं श्मशानमदिम् ॥६७॥ (ट)

(भ) विषयेति । विषयाणां पवनानां मारणानाम् अनेकैः बहुभिः कङ्कालैः अस्थिभिः सङ्कुलं व्याप्तम् ।

(ग) चञ्चदिति । चञ्चता चञ्चता चञ्चारचेन गरुडेनेति शेषः क्षतं छिन्नं सत् च्युतं भ्रष्टं यत् पिशितं मांसं तस्य ग्रासस्य ग्रसनस्य ग्रहा ग्रहणा सङ्घाता सङ्घा लिप्सा येषां तादृशैः मांसग्रसनलोलुपैरित्यर्थः गृध्रैः श्मशानीयपक्षिविशेषैः आबद्धस्य पक्षद्वितस्य पक्षद्वयस्य विधुतिभिः कम्पनैः सङ्घातनैरिति यावत् बद्धः सङ्कटितः सान्द्रः घनः अन्धकारो यस्मिन् तादृशे, ... । अजस्रा अविरता स्रुतिः स्रावो यासां तथाभूतानां बहूनां प्रभूतानां वसानां भेदया वाहेन संसर्गेण विस्रे आमगन्धिनि विस्रं दुर्गन्धमगन्धि यदिस्रम् । अस्मिन् अस्थाने रुधिराणां क्षोतसि प्रवाहे शिवानां शृगालाणां वल्गुभ्यः सुखेभ्यः उद्दान्ताः उद्गीर्णाः अत एव श्रमिताः निर्वाणं गताः शिखिनाम् अग्नीनां शिखास्तिताभिति भावः शिखाग्रेषव इव ये स्वनन्ति शब्दायन्ते । अन्धकारदम् ।

(ट) प्रतिदिनमिति । प्रतिदिनम् अहिना आहारेण अन्यत्र महिना चारेण, विनायकेन बीजां पक्षिणां नायकेन आधिपः

भवति। अहपुत्र! तदनन्तरं किमिति [illegible]
आसे? (ठ)।

मह। आसवः (ठ) खलु मदहआगमनसमयः। आ-
एवतो आउआं खिवा। अज्ज! त्वमपि निवर्त्तस्व इदानीम्।

खलुत्वत्यागमे मातर्यत्नां यत्नां ततो यथम्।
तत्नां तत्नां प्रियसुते! माता भूयास्त्वमेव नः॥६८॥(ड)

पादयोः पतति।

इन्द्रा। वाचम्। जइ अवच्छिमवयणं (च) पुत्तय! व
क्खु, तुमं उज्झिअ मे पाया पत्थदो वहन्ति, ता इह एव्व
तुए सह चिट्ठिस्सं (२०)।

---

(२०) यदवमपश्चिमवचनं पुत्रक! न खलु त्वाम् उज्झित्वा मे पादौ अन्यतो वहन्ति, तदिहैव त्वया सह स्थास्यामि।

मदहस्य दृत्यर्थः अन्यत्र विनायकस्य मयूरस्य विनायके विघ्नराजहैमातुरमयूराधिपा दृत्यमरः। आश्विता अनिता प्रीतियेन तादृशं शशिधवलं चन्द्रवत् शुभ्रम् अक्षि एव कपाले नरशिरः यस्य तथाभूतम् अतएव इदं शुभ्रगात्रं रौद्रं महाहेदं वपुरिव धरोरसिव विभातीति यथः।

(ठ) आसोपस्थासैः सान्त्ववचनैः।

(ड) आसवः वश्चितः।

(ढ) खलुत्वत्यागमे इति। हे प्रियसुते प्रियपुत्रे मातः! यत्र यत्नां यत्नां ततो मातादिवर्यः खलुत्वत्यागमे अभिप्रायमे, तत्नां तत्नां त्वमेव नः अस्माकं माता भूयाः।

(च) अवच्छिमवयणं नास्ति पश्चिमं यस्मात् यत्र तादृशं वचनं मातःपरं ते वचनं श्रोष्यामीति भावः।

बकुः । उत्साह । अवादृश्यमपि अदूरे भगवन्तं हरिषण्णीकर्षं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि (त) । अले निष्क्रान्तो ।

नायकः । इदं कर्पूरवासजलम् । दिव्या सिद्धमिथुनाक्षिप्तम् अनेन अतर्कितोपनतेन (थ) रत्नांशुकयुगलेन ।

प्रविश्य ।

बकुली । इदं वासोयुगं देव्या मित्रावसुजनन्या कुमाराय प्रेषितम्, तदेतत् परिधत्तां कुमारः ।

नायकः । सादरम् । उपनय ।

बकुली । उपनयति ।

नायकः । गृहीत्वा आत्मगतम् । सफलीभूतो मे मलयवत्याः प्राधिगमः । प्रकाशम् । बकुलिके ! गच्यतां, मदचनादभिवादनपूर्वा देवी ।

बकुली । यदाज्ञापयति कुमारः । इति निष्क्रान्तः ।

नायकः । वासोयुगमिदं रत्नं प्राप्ते काले समागतम् ।
मद्गतीं प्रीतिमाधत्ते परार्घ्ये देवकल्पतः ॥ ६९ ॥ (द)

दिशोऽवलोक्य । यथार्थं चलितमलयाचलशिखास-

(त) अवात् वेगात् । दक्षिणस्यां दिशि तदाख्यं गिरिकूटनिवासिनः । स्वाम्यादेशं स्वामिनः प्रभोर्नागराजस्य आदेशम् ।

(थ) अतर्कितोपनतेन असम्भावितोपस्थितेन ।

(द) वासोयुगमिति । प्राप्ते काले उपयुक्ते समये समागतम् इदं रत्नं वासोयुगं वस्त्रयुगलं परार्घ्ये देवेषु कल्पतः त्यजतः मे मम मद्गतीं प्रीतिम् आधत्ते जनयति ।

क्षयः प्रचण्डो नभसान् (घ) तथा तर्कयामि यावद्वीभूतः
खलु पक्षिराज इति। तथाहि,

तूष्णीं संवर्त्तकाख्यैः पिदधति गगनं पंक्तयः पक्षतीनां
तीरे वेगानिलोऽभ्रः क्षिपति भुव इव ह्रावनायाम्बुराशेः।
कुर्वन् कल्पान्तशङ्कां सपदि च सभयं वीक्षितो दिग्द्विपेन्द्रैः
देहोद्योतैर्दृशाया: कपिश्यति मुहुर्हृदयादित्यदीप्तिः ॥७०॥

(ङ)

तद् यावदसौ नागच्छेत् यङ्कचूडः, तावत् त्वरिततरमिमां बध्यशिलामारोहामि। तथा कृत्वा उपविश्य स्वयं नाटयति। अहो स्वर्गोऽयम्।

न तथा सुखयति मनो मलयवती मलयचन्दनरसार्द्रा।
अभिवाञ्छितार्थसिद्ध्या बध्यशिलेयं यथाश्लिष्टा ॥७१॥ (च)

(घ) क्षयेति। क्षयितः क्षयमानः भटः मलयवचन्द्र गिरा-सञ्चयः यस्मात् तथाभूतः प्रचण्डः यङ्कान् नभसान् वायुः।

(ङ) तूष्णीं इति। संवर्त्तकाख्यैः संवर्त्तकाख्यमेघैः तूष्णीं यथा पक्षतीनां पक्षिणां श्रेण्यः गगनं पिदधति आच्छादयन्ति। वेगानिलः भुवः ह्रावनाय इव अम्बुराशेः तीरे अभ्रः क्षिपति। कल्पान्तशङ्कां प्रलय-सन्देहं कुर्वन् जनयन् अतएव सपदि सहसा दिग्द्विपेन्द्रैः दिग्गजैः सभयं वीक्षितः दृष्टः तथा हृदयादित्यदीप्तिः हृदयसूर्यकान्तिभः अयं गरुत्मान्, देहस्य उद्योतैः प्रभाभिः शुक्लः पुनः पुनः इव आशा दिशः कपिश्यति कपिशाः पिङ्गलाः करोति। सन्ध्याराग इव।

(च) नेति। मलयचन्द्नरसेन आर्द्रा स्निग्धा मलयवती आश्लिष्टा सती तथा मनो न सुखयति सुखीकरोति, अभिवाञ्छितस्य अर्थस्य धर्मधनकामरूपस्य सिद्ध्या आश्लिष्टा आलिङ्गिता इयं बध्य-शिला यथा सुखयतीति शेषः।

अथवा किं मलयवत्या ?—

यवितेन मातुरङ्के विश्वस्तं शैशवे न तत् प्राप्तम् ।
तत्र सुखं मलयाद्या वध्यशिलायां यदुत्सङ्गे ॥२१॥ (क)

तदयमागतो मलयवान्, यावदात्मानमाच्छादयामि । तथा करोति ।

ततः प्रविशति गरुडः ।

गरुडः ।

दृष्ट्वा विश्वं क्षितिगोभंक्षतवपुषां संभरन् शैलमूर्त्ति
क्षामन्दं स्कन्धाग्रक्षपणविचलिते पुच्छि दृष्टोऽपलेन ।
एष प्राप्तावसन्ध्यक्षणधरपटलैरायतीभूतपक्षः
प्राप्तो वैक्षामहीध्रं मलयमहमहिप्रासयत्नुः क्षणेन ॥२२॥ (ख)

नायकः । उपरितोऽस्म् ।

(क) यवितेनेति । शैशवे बाल्ये मातुः अङ्के क्रोडे विश्वस्तं निःशङ्कं यवितेन मया तत् सुखं न प्राप्तम्, अद्या वध्यशिलाया उत्सङ्गे क्रोडे यवितेन यत् सुखं प्राप्तमिति शेषः ।

(ख) दृष्ट्वेति । क्षितिगोभंक्षतवपुषां विश्वं दृष्ट्वा अनेन मम इति शेषः हतं वधकं मलयवाचारेण छलयता मया तादृशां बहूनां भक्षीभिलाषेः शैलस्य चलनसामर्थ्यं मूर्त्तिं संभरन्, स्कन्धाग्राणां रचानां क्षपणेन मम इति शेषः विचलिते चलिते सत्यात्मानमात्मा इति यावत् पुच्छि पुच्छे अपलेन अदृश्येन स्कन्धेन सामन्दं आतायं मे दास्यतीति वाञ्छादं दृष्टः, तथा प्राप्तैः अतएव अवसन्ध्यक्षणधरपटलैः आयतीभूताः दीर्घीभूताः विस्तारं गता दृश्यर्थः पक्षा यस्य तथोक्तः एषः अहम् अक्षीणां मानानां क्षान्तिं भक्षयितुं क्षोभुवः वज्रं क्षणेन वैक्षामहीध्रं बहुशृङ्गटङ्कितं मलयपर्वतं प्राप्तः । अन्वराटस्म् ।

संरक्षता पक्षगमद्य पुण्यं
मयार्जितं यत् अशरीरदानात् ।
भवे भवे तेन ममैव भूयात्
परार्थहेतोः खलु देहलाभः ॥७४॥ (म)

गरुडः । नायकं निर्वर्ण्य ।

अस्मिन् वध्यशिलातले निपतितं शैलानहीन् रक्षितुं
निर्भिद्यायसनिश्चलैकचरणैस्तीक्ष्णतरया चञ्चुधुना वक्षसि ।
भोक्तुं भोगिनमुद्धरामि तरसा रक्ताम्बरप्रावृतं
दिग्धं मद्भयदीर्ण्यमाणहृदयप्रस्यन्दिनेशासृजा ॥७५॥ (म)

इत्यभिधाय नायकं स्पृशति, नेपथ्ये पुष्पाणि पतन्ति, दुन्दुभयश्च ध्वनन्ति ।

गरुडः । सविस्मयम् । अये !

आमोदानन्दितालिनिपतति किमियं पुष्पवृष्टिर्नभस्तः
स्वर्गं किं वैष चक्रं मुखरयति दिवां दुन्दुभीनां निनादः ।

(भ) संरक्षतेति । अद्य अशरीरदानात् पक्षगं संरक्षता मया यत् पुण्यम् अर्जितम् अनुष्ठितं तेन पुण्येन भवे भवे जन्मनि जन्मनि परार्थहेतोः खलु परत्राणार्थमेव मम देहलाभो भूयात् । उपजातिवृत्तम् ।

(म) अस्मिन्निति । शैलान् अहीन् नागान् रक्षितुम् अस्मिन् वध्यशिलातले निपतितम् एनमिति शेषः अधुना अयसनिश्चलैकचरणतरया वज्रवदेव अतिप्रचण्डया चञ्चुया वक्षसि निर्भिद्य रक्ताम्बरप्रावृतं रक्तवस्त्राच्छादितम् अतएव मद्भयेन दीर्ण्यमाणात् स्फुटत्वात् प्रस्यन्दिना स्रवता असृजा रुधिरेण दिग्धमिव लिप्तमिव भोगिनं पन्नगं भोक्तुं तरसा बलेन वेगेन वा उद्धरामि । गादूढवृत्तिक्रीडितं वृत्तम् ।

विदूषक ।

आः ज्ञातं सोऽपि मन्ये मम जवमहता कम्पितः पारिजातः
सर्वैः संवर्त्तकाभ्रैरिदमपि रचितं ज्ञातसंहारमद्भैः ॥७६॥
(य)

नायकः । आलम्बताम् । दिष्ट्या कृतार्थोऽस्मि ।

गरुडः । नायकं वलवत् (र) ।

नागानां रचिता भाति पुरुषेषु यथा मम ।
तथा सर्पाशनाकांक्षां व्यक्तमद्यापनेष्यति ॥७७॥ (ल)

तद् यावदेनं गृहीत्वा मलयपर्वतमारुह्य यथेष्टमाहारयामि । इति निष्क्रान्तः ।

इति निष्क्रान्ताः सर्वे ।

इति चतुर्थोऽङ्कः ।

(य) आमोदेति । आमोदेन सौरभेण आकृष्टिता अलयो भ्रमरा यस्य तादृशो पुष्पाणां वृष्टिः दृश्यं किं कथं नभसः व्याकाशात् निपतति ? किंवा कथं वा स्वर्गे एष दुन्दुभीनां निनादः दिशां चक्रं दिग्मण्डलं मुखरयति ध्वनयति ?

आः ज्ञातमिति । आः ज्ञातं सम्यक् विदितं मम जवमहता वेगातिशयेन सोऽपि पारिजातः कम्पितः तेनैतत् वृष्टिरिति भावः सर्वैः संवर्त्तकाभ्रैः तदाख्यमेघनिचयैः ज्ञाता संहारस्य प्रलयस्य मद्भः रेणुभिः तथाभूतैः सद्भिः इदं रचितं सङ्घटितमपि इति मन्ये अवधारयामि । सम्भावयामि ।

(र) बलवत् अत्यर्थम् ।

(ल) नागानामिति । नागानां रचिता सृष्टिरपि अयं पुरुषेषु मध्ये यथा भाति राजते तथा व्यक्तं निश्चितम् अद्य मम सर्पाणाम् भक्षणाकाङ्क्षां भोजनेच्छाम् अपनेष्यति ।

अथ पञ्चमोऽङ्कः ।

ततः प्रविशति प्रतीहारः ।

प्रती० । स्वगृहोद्यानगतेऽपि स्निग्धे पापं विशङ्कते क्षेत्रात् ।
किमु दृष्टभक्षपायप्रतिभयकान्तारमध्यस्थे ॥७८॥ (क)

तथाहि—जीमूतवाहनो जलनिधिवेलावलोकनकुतूहली निष्क्रान्तश्चिरयतीति दुःखमास्ते महाराजविष्णावसुः । समादिष्टवान्मि तेन । यथा—सुनन्द ! श्रुतं मया सविहितगरुडप्रतिभयमुद्देशं जामाता जीमूतवाहनो गत इति ग्रहित एवास्मि अनेन । तत् त्वरितं विज्ञायागच्छ किमसौ स्वगृहमागतो नवेति । यावत्तत्र गच्छामि । परिक्रामदग्रे दृश्य । अयमसौ राजर्षिर्जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गने सह स्वधर्मचारिण्या राजपुत्र्या च पर्य्युपास्यमानस्तिष्ठति (ख) । तथाहि ।

(क) स्वगृहेति । स्निग्धे स्नेहभाजने जने स्वस्य स्वगृहस्य उद्यानगतेऽपि स्नेहात् पापम् अनिष्टं विशङ्कते मन्यते, दृष्टः भक्षः उपायः विनाशः यत्र तादृशं प्रतिभयं भयङ्करं भीषणं भयङ्करं प्रतिभयमित्यमरः । यत् कान्तारं दुर्गमं वनं कान्तारो वर्त्म दुर्गमित्यमरः । तत्र तिष्ठतीति तथाभूते स्निग्धे किमु ? किं वक्तव्यं गङ्गायामित्यर्थः । आर्य्यावृत्तम् ।

(ख) सविहितेति । सविहितेन समागतेन गरुडेन प्रतिभयं भयङ्करम् । पर्य्युपास्यमानः सेव्यमानः ।

क्षौमे भङ्गवती तरङ्गतरले फेनाम्बुतुल्ये वहन्
आङ्क्ष्येव विराजितः सुषमया देव्या महापुण्यया ।
धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैवान्तिकवर्त्तिनी मलयवत्याभाति देवी यथा ॥९८॥

(ग)

तद् यावदुपसर्पामि ।

ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः ।

जीमू० । भुक्तानि यौवनसुखानि यशोऽवकीर्णं
राज्ये स्थितं स्थिरधिया चरितं तपोऽपि ।
श्राघ्यः सुतः सुसदृशान्वयजा सुषेयं
चिन्त्यो मया नन् कृतार्थतयाद्य मृत्युः ॥९०॥ (घ)

(ग) क्षौमे इति । भङ्गवती भाङ्गमती इत्यर्थः तरङ्गतरले ऊर्मिचपले फेनाम्बुतुल्ये फेनजलनिभे क्षौमे पट्टदुकूले वहन् दधानः सुषमया विशदाभ्या आङ्क्ष्या इव महापुण्यया अतिपवित्रया देव्या भूम्या विराजितः शोभितः अयं जीमूतकेतुः तोयनिधेः समुद्रस्य सुसदृशीम् अनुरूपां श्रियं शोभां धत्ते धारयति यथा मलयवती यस्य जीमूतकेतोः नमीपवर्तिनी देवी यथा शोभते देवी आलोरोरोरोरुरुरः । आभाति भाजते । भाद्भ्वादिकं क्विप् इत्यम् ।

(घ) भुक्तानीति । मया यौवनसुखानि भुक्तानि, यशसा अवकीर्णं व्याप्तादिते पूर्णं इत्यर्थः राज्ये स्थितं यशसा सह राज्ये पालितमित्यर्थः, स्थिरधिया अनन्यमनसा इत्यर्थः तपः चान्द्रायणादिकमपि चरितं कृतम् । सुतः पुत्रः जीमूतवाहनः श्लाघ्यः सर्वजनप्रशंसनीय इत्यर्थः एवञ्च सुसदृशान्वया अनुरूपवंशोद्भवा सुषेया पुत्रवधूः मलयवतीत्यर्थः नन्वतएव अद्य इदानीं मया कृतार्थया सर्वेषु विषयेषु चरितार्थतया कृतुः चिन्त्यः प्राप्तोऽयमेवेति भावः ।

दुष्यन्तः। प्रतीहारोपनय। जीमूतवाहनम्।

जीमू। अयं विधानः। आत्मा पावनः।

इडा। पडिहदं खु एदं ममङ्गलं (१)।

मलयवती। वेवदि मे हिदयं दुस्सिमित्तेण (२)।

जीमू। वालाश्चिन्तनं कुरुषिता। भद्रे! किं जीमूतवाहनम्।

दुष्यन्तः। जीमूतवाहनस्य वार्तामन्वेष्टुं महाराजविज्ञापनया युष्मदन्तिकं प्रेषितोऽस्मि।

जीमू। किमसन्निहितस्तत्र मे वत्सः।

इडा। सविषादम्। महाराज! जइ तहिं ण सन्निहिदो ता कहिं गदो मे पुत्तओ भविस्सदि (३)।

जीमू। नूनमस्मदाचरणार्थं (क) गतो भविष्यति।

सर्व। सविषादमात्मगतम्। अहं उण अज्जउत्तं अपेक्खन्ती एत्थ एव्व किमपि आसङ्कामि (४)।

दुष्यन्तः। आज्ञापय। किं मया स्वामिनो निवेदनीयम्।

---

(१) प्रतिहतं खल्वेतदमङ्गलम्।

(२) वेपते मे हृदयमनेन दुर्निमित्तेन।

(३) यदि तत्र न सन्निहितस्तत् क्व गतो मे पुत्रको भविष्यति।

(४) अहं पुनरार्यपुत्रमपेक्षमाणाऽत्रैव किमपि आशङ्के।

एवं जनन्यादेशं यदा खलुतकं मह्यामीति चिन्तयामीत्यर्थः। यत्तत्तिरस्कृतं दृश्यम्।

(क) अस्मदाचरणार्थम् अस्मदर्थं जीविताशयाऽरक्षार्थमित्यर्थः।

जीमू। वाक्यविन्यासं सूचयित्वा। जीमूतवाहनस्थिरयतीति पर्यायाकुलोऽपि सूक्ष्मेक्षिकया।

स्फुरसि किमु दक्षिणेतर! क्षतचक्षुरयक्षतं ते स्फुटमिदानीं करिष्यति भानुः॥ ८१॥

(च)

अर्धमवलोक्य। अयमेव विभुवनैकचक्षुर्भगवान् सहस्रदीधितिः स्फुटं जीमूतवाहनस्य श्रेयः करिष्यति।

विलोक्य सस्मितम्।

आलोक्यमानमतिलोचनदुःखदाग्नि
रक्ताच्छटा निजमरीचिरुचो विमुञ्चत्।
उत्पातवाततरलीकृततारकाभम
एतत्स्फुरः पतति किं सहसा नभस्तः॥ ८२॥(छ)

(च) स्फुरसीति। हे दक्षिणेतर! क्षतचक्षुः दुर्नेत्र! मुहुः मुहुः पुनः मम व्यक्तिं सूचयत् प्रकटयत् किम् किमर्थं स्फुरसि अन्दसे? अयं भानुः सूर्यः दक्ष मदक्षे इति भावः ते तव स्फुरितम् अपक्षतं विनाशितं करिष्यति सूर्यदेवस्य प्रसादेन दक्षिणाक्षुरन्दनरूपं दुर्निमित्तं नश्यतीति भावः।

(छ) आलोक्यमानमिति। आलोक्यमानं दृश्यमानम् अतिलोचनदुःखदाग्नि नवनवोरितिदुःखदं निजमरीचिरुचः निजस्य स्वस्य मरीचीनां प्रभाणामिव रुचः प्रभा यासां तादृशीः रक्ताना छटा धाराः मुञ्चत् मुञ्चत, तथा उत्पातवातेन दुर्निमित्तपवनेन तरलीकृता चञ्चलीकृता अत्यन्तं चलिता इत्यर्थः या तारका नक्षत्रं तस्येव आभा यस्य तादृशम् एतत् किं वस्तु सहसा नभसः आकाशात् पुरः अग्रतः पतति? पतनतिक्रमं दृश्यम्।

अयं वरचूडोरत्न पतितम् । अहो निष्प्रभम् ।

जीमू । अरे ! अयं [illegible] (अ) ।

कस्य पुनरयं स्यात् ।

इडा । विषादम् । महाराज ! पुत्तयस्स विअ मे एसो चूडारयणो (५) ।

मल । अम्ब ! मा एवं भण (६) ।

सुनन्दः । महाराज ! मैवमविज्ञाय विज्ञापयो भूः । यतो हि ताक्ष्यैर्यमाणानां नागाधिपानामनेके नखसुखोत्खाताः (आ) पतन्त्येते शिरोमणयः ।

जीमू । देवि ! सोपपत्तिकमभिहितम् (इ) । कदाचिदेवमपि स्यात् ।

इडा । सुणन्दअ ! जाव इमाए वेलाए ससुरसदसं एव्व आगदो मे पुत्तओ भविस्सदि । ता गच्छ तावित्र लहुं सम्पादेहि (ट) । (७)

---

(५) महाराज ! पुत्रकस्येव मे एतच्चूडारत्नम् ।

(६) अम्ब ! मैवं भण ।

(७) सुनन्दक ! यावदनया वेलया श्वशुरभवनसमागतो मे पुत्रको भविष्यति । तद्गच्छ तावत् लघु सम्पादय ।

(अ) अहो इति । अहो खल्वयम् आहो रत्नाकर इति यावत् यावत् यस्मिन् तथाभूतः । चूडामणिः शिरोरत्नम् ।

(आ) ताक्ष्यैर्यमाणैः । नखमुखेन नखाग्रेण उत्खाता उत्पाटिताः ।

(इ) सोपपत्तिकं सयुक्तिकम् ।

(ट) सम्पाद्य आगच्छेत्यर्थः ।

जीमूत । महाराजपत्नि देवी । इति विस्मृता ।

जीमूत । देवि ! अपि नागचूडामणिः आत्मा ।

ततः प्रविशति रक्तवस्त्रसंवीतः (ङ) मलयवतीः ।

मलय । नाथ ।

सौवर्णमर्घवलटे त्वरितं प्रपद्य
प्राप्तोऽसि तां खलु भुजङ्गमवध्यभूमिम् ।
आदाय तं मलयसुन्दरवक्षसस्त्वं
विद्याधरं गगनमुत्पतितो गरुत्मान् ॥ ८१ ॥ (च)

हन्त । हा महासत्त्व ! हा परमकारुणिक ! हा निष्कारणैकबान्धव ! हा परदुःखदुःखित ! क्व गतोऽसि प्रयच्छ मे प्रतिवचनम् । हा भूतचूडकृतक ! किं कृतं त्वया ?

नाद्यिष्यावा कीर्तिरेकाङ्गमासा
नापि श्राद्धा स्वामिनोऽनुष्ठिताद्या ।

(ङ) रक्तेति । रक्तवस्त्राभ्यां संवीतः आच्छादितः ।

(च) सौवर्णेति । अर्घवलटे वसुधातीरे सौवर्णं महान्तं शिवशिरं प्रपद्य त्वरितं सत्वरं भुजङ्गमानां मध्यभूमिं प्राप्तः आगतः असि खलु । मलयाच्च मलयसुन्दरेण मलयेन च सत्वं विद्याधरं यथो चक्षिनु तथा तथा तं विद्याधरम् आदाय गृहीत्वा गगनम् आकाशम् उत्पतितः । अत्र प्राप्त्युत्पतनक्रिययोर्योगपद्यात् समुच्चयोऽयमलङ्कारः । गरुत्मान् दर्पेण, वसुधयोऽयमेकस्मिन् इति कार्यस्य बाधके । सति अपीतिशब्दाद्यात् तत्सदृशेषु परोऽपि येषु । शुभौ क्षिप्रं वा युगपत् आतां यद्वा शुभक्षिप्रे इति । वसन्ततिलकं वृत्तम् ।

(छ) नेति । हे भूतचूड कृतक इति आक्रामं प्रति आक्षेपोक्तिः त्वया एकाङ्गम् अभिलाषाद्यार्थ्यः एकस्मिन्नपीत्यर्थः अङ्गीनु

दत्त्वात्मानं वञ्चितोऽन्येन मोघो
हा धिक् ! कष्टं ! वञ्चितो वञ्चितोऽस्मि ॥ ८४ ॥ (ङ)

तन्नाहमेवंविधः क्षणमपि जीवन्यदाभ्यमात्मानं करोमि । यावदेतदनुगमनं प्रति यतिष्ये । परिक्रामन् भूमौ दत्तदृष्टिः ।

आदावत्योऽपुष्पीं प्रविरलपतितस्थूलबिन्दुं ततोऽग्रे
यावच्चायासयाणैप्रसृततनुकणां कोटकीर्णां स्थलीषु ।
दुर्लक्ष्यां धातुभिश्च घनतरगिरिस्रंस्थाननीलस्वरूपाम्
एतां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन् रक्तधारां व्रजामि ॥ ८५ ॥

(ण)

भूरुहन्त आयते इति यदिदानीं कीर्णः न व्याप्ता न प्राप्ता रक्तधारेति यथा भूरुहान्ता इति कीर्णेन लक्ष्या । स्वामिनः प्रभोः नागराजस्येत्यर्थः । तार्क्ष्या आदरणीया अपि नापि अनुचिता लघ्वी भूरुहन्ता आत्मा यैः इति व्याख्यातेनो न पौनरुक्त्यदोषः । अनेन केनचित् साधुनेति अनार्यं दत्त्वा रक्षितः परिवारः यैः, हा कष्टं शोच्यः मोघोऽयः वस्तु मारयति येभः तेषा वञ्चितः अतिशयेन वञ्चितः विशेषेण वञ्चितोऽस्मि, धिक् त्वां निन्दामीत्यर्थः धिक् निर्मेत्रीनिरन्तरयोरिदमरः ।

(ण) आदावित्यादि । अत्र तार्क्ष्यं गरुत्मन्तं दिदृक्षुः द्रष्टुमिच्छुः अनुव्रजमिमुरिति भावः व्याप्तौ प्रथमम् अत्यौढेन अतीढेन मुहुर्निपीडनेनेति यावत् पुष्पीमभूतीं ततः अनन्तरम् अग्रे पुरतः प्रविरला अघनाः पतिताः स्थूला बिन्दवो यस्यास्तादृशीं तत एवाल्पाल्पाः आयासु शिलासु आयासेन दैर्घ्येण क्षीणाः तनूभूताः प्रसृताः विस्तृताः तनवः क्षुद्राः कणाः यस्यास्तथाभूतां स्थलीषु वनभूमिषु कोटेः जङ्गलैः पिपालिकादिभिरित्यर्थः कीर्णां व्याप्तां, धातुभिः गैरिका-

हन्त। सवाष्पम्। महाराज! एसो ससीसो विअ अरुणवडपडो दूदो एव्व तुरिदं आवच्छन्तो हिअअं मे आकुलीकरेदि। ता जाणीअदु दाव को एसोत्ति (८)।

ओम्। यद्याह देवी। आकर्ण्य सहर्षं विहस्य। देवि! मुञ्च शोकम्। अस्यायं चूडामणिनैनं मांसलोभात् केनापि पक्षिणा मस्तकादुत्खाय आनीयमानोऽस्यां भूमौ पपात।

हन्त। सपरितोषम्—मलयवतीं प्रगृह्य। अविधवे! धीरा होहि। ण क्खु ईदिसो आकिदी वेइव्वदुक्खं पणुक्कोदि (९)।

मल। सदुःखम्। अज्ज! तुम्हाणं आणिमो पसाएण (१०)। पादयोः पतति।

ओम्। वत्से! कथमिव।

---

(८) महाराज! एष सशीर्षक एव अरुणपटः द्रुत एव त्वरितमागच्छन् हृदयं मे आकुलीकरोति। तत् जानीतां तावत् क एष इति।

(९) अविधवे! धीरा भव। न खल्वीदृशो वा आकृतिर्वैधव्यदुःखमनुभवति।

(१०) अज्ये! युष्माकमाज्ञया प्रसादेन।

टिट्टिभिभिः रक्ष्यते प्रदेशे इति भावः दुर्लक्ष्यः दुष्टस्य तुल्यवर्णत्वादिति भावः। तथा चलानां मांसानां तरूणां शिखरेषु उपरिभागेषु स्थानं इदृशं मतं नीचं स्वरूपं यस्यासौ नीचस्थानसंयोगेन नीचीभूतामिति भावः। अतो रक्षणारं निपुणं यथा तथा अहमेनं ग्रहामि नयामि। खगराजसुतम्।

वत्स। दुःखातिभाराद् वाष्पोपरुद्धकण्ठो न शक्नोमि कथयितुम्।

जीमू। आवेदय ममाकूतं पुत्रदुःखं सुदुःसहं।

संक्रान्तमस्ति हृदये येन सख्यं भविष्यति ॥८५॥ (त)

वत्स। श्रूयताम्। शङ्खचूडो नाम नागः खलूद्यम् आहारार्थं वासुकिना वैनतेयाय प्रेषितः। किं वा विस्तरेण। कदाचिदद्य रुधिरधारापङ्कितः पांशुभिरवकीर्य्यमाणा दुर्लक्ष्यतामुपयाति (ध)। तत् संक्षेपतः कथयामि।

विद्याधरेण केनापि करुणाविष्टचेतसा।

मम संरक्षिता: प्राणा दत्त्वात्मानं गरुत्मते ॥८७॥ (द)

जीमू। कोऽन्य एवं परार्थितव्यसनी (ध)। वत्स! ननु स्पष्टमेवोच्यतां जीमूतवाहनेनेति। हा हतोऽस्मि! मन्दभाग्यः।

(त) आवेदयेति। आवेदय विस्तारय, मम आकूतं स्वीयं सुदुःसहं पुत्रदुःखं पुत्रार्थं वैक्लव्यरूपं हृदये संक्रान्तं स्थितम् अस्ति, येन हृदयस्थितेन सख्यं तवावेदनमिति भावः भविष्यति।

(ध) रुधिरधारेति। रुधिराणां धारापङ्क्तिः धारापिच्छम्। पांशुभिः धूलिभिः अवकीर्य्यमाणा आच्छाद्यमाना। दुर्लक्ष्यताम् अदृश्यतामित्यर्थः।

(द) विद्याधरेणेति। केनापि करुणाविष्टचेतसा विद्याधरेण गरुत्मते आत्मानं स्वदेहं दत्त्वा मम प्राणा रक्षिताः।

(ध) परेति। परेषां स्थिते स्थितानुज्ञाने अवनौ आसक्तः निरतः दुष्टार्थः।

दृष्ट्वा । हा पुत्तक ! कहं तुए एदं कअं (११) ।

मल । कहं सच्चीभूदं एव्व दुच्चिन्तिदं (१२) । अय्ये ओसर गच्छन्ति ।

शङ्ख । साधु । नूनमेतौ पितरौ तस्य महासत्त्वस्य । कथमप्रियवादिना मया इमामवस्थां नीतौ । अथवा विषाहते विषधरस्य मुखात् किमन्यद्विःसरति । अहो । प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन । तत् किमधुनैवात्मानं व्यापादयामि । अथवा समाश्वासयामि तावदेतौ । तात ! समाश्वसिहि । अम्बा समाश्वसितु । उभौ समाश्वसितः ।

दृष्ट्वा । वच्छे ! दट्ठेहि मा रोध । अम्हे किं जीमूतवाहणेण विणा जीवम्ह । ता समस्सस दाव (१३) ।

मल । समाश्वस्य । अज्जउत्त ! कहिं मए तुमं पेक्खिदव्वो (१४) ।

जीमू । हा वत्स ! गुरुचरणशुश्रूषाविधिज्ञ ! ।

चूडामणिं चरणयोर्मम पातयता त्वया ।

लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥८८ (ल)

(११) हा पुत्रक ! कथं त्वयेदं कृतम् ।

(१२) कथं सत्यीभूतमेव दुश्चिन्तितम् ।

(१३) वत्से ! उत्तिष्ठ । मा रोदीः । वयं किं जीमूतवाहनेन विना जीवामः । तत् समाश्वसिहि तावत् ।

(१४) आर्यपुत्र ! क्व मया त्वं प्रेक्षितव्यः ।

(ल) चूडामणिमिति । त्वया मम चरणयोः चूडामणिं पातयता

चूडामणिं दृष्ट्वा। हा वत्स! कथमेतावन्मात्रदर्शनः संवृत्तोऽसि। हृदये दत्त्वा। अहह!!!

भक्त्या सुदूरमवनामितनम्रमौलेः
प्रत्यक्षतव प्रणमतश्चरणौ मदीयौ।
चूडामणिर्निकषणैर्मसृणोऽप्यहिंस्रो
गाढं विदारयति मे हृदये कथन्नु ॥८८॥ (प)

हा। हा पुत्त जीमूदवाहण! जम्म दे गुरुजणसुस्सूसं वज्जिअ अण्णं सुहं ण रोअदि। सो कहिं दाणिं पिदरं उज्झिअ सोग्गसुहमणुहोदुं गदोसि (१२)।

आम। जीवम्। देवि! किं जीमूतवाहनेन विना जीवामो वयं येनैवं प्रलपसि।

मल। मदयन्तिकाया अतालिः। ता देहि मे अज्जउत्त-

---

(१२) हा पुत्र! जीमूतवाहन! यस्ते गुरुजनशुश्रूषां वर्जयित्वा अन्यत् सुखं न रोचते। स कस्मिंदानीं पितरमुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि।

(प) भक्त्येति। भक्त्या सुदूरम् अत्यन्तम् अवनामितः नम्रः स्वभावविनतः मौलिः मस्तकं येन तादृशस्य प्रत्यक्षं सततं मदीयौ चरणौ प्रणमतः वन्दमानस्य तव चूडामणिः निकषणैः घर्षणैः मसृणोऽपि स्निग्धोऽपि अहिंस्रः कोमलः सन् हृदये मदीये हृत इति शेषः कथन्नु कथं वा गाढम् अत्यन्तं विदारयति कथमहं चरणयोर्म्योऽपि हृदये धार्य्य इति तर्कयतीवेति भावः। वक्ष्यतितर्कं हृत्वम्।

चिल्लं चूडामणिं जेण एदं हिअए कदुअ जलणप्पवेसेण अवणेमि हिअअस्स सन्तावदुक्खं (१६)।

जीमू। पतिव्रते! किमेवमाकुलयसि। ननु सर्वेषामेवाक्रान्तमर्थं निश्चयः।

शङ्ख। महाराज! ता किं अम्हेहिं पडिपालीअदि। (१७)

जीमू। न खलु देवि! किञ्चित्। किन्त्वाहिताग्नेर्नाग्निनाग्निना संस्कारो (फ) विहितः। अतोऽग्निशौचवद् आदरनीनादायालानमुद्वहयामः।

शङ्ख। अज्जअस्स। जाव मंसकय्य कुदं सअलसेवेदं विज्जाहरकुलसंच्चिअम। तदेवं ताव। अकज्जम। ताद। न खुज्झणिच्चिदेव गदजीविदमीदिसं साहसमणुहावेदुं। अविचाराणि हि दैवविलसितानि। कदाचिच्चाय णाग इति ज्ञात्वा परित्यजिष्यामस्तम्।

शङ्ख। सव्वहा देवदाणं पसादेण जीमूदस्स पुत्तअस्स मुहं दक्खिस्सं। (१८)

(१६) यद्येतं मे आत्मजीवितस्य चूडामणिं जनन्या हृदये हत्वा ज्वलनप्रवेशेन अपनयामि हृदयस्य सन्तापदुःखम्।

(१७) महाराज! तत् किमस्माभिः प्रतिपाल्यते।

(१८) सर्वथा देवतानां प्रसादेन जीमूतस्य पुत्रस्य मुखं द्रक्ष्यामः।

(फ) आहिताग्नेः अग्निहोत्रिणः अन्येन आहितातिरिक्तेन। अग्निरो दाहः।

भट। आत्मगतम्। दुक्करं कदुएदं मम मन्दभग्गाए। (१८)

[दुष्करं कटुकमिदं मम मन्दभाग्यायाः।]

राजा। वत्स! अविलम्बेषा तव भारती भवतु। तथापि साम्प्रतमिदमस्माकं (क) युक्तमनुष्ठातुम्। तदनुसरतु भवान्। वयमप्यग्निशरणादग्निनादाव लरितमेवानु गच्छामः। प्रतीहारलेखा निष्क्रान्ताः।

भट। तद् यावद् गरुडमनुसरामि। (इति निष्क्रान्तः।

कुर्व्वाणो वधिराद् गरुत्मपवनद्रोणीरिवाद्रेर्लवाः
ज्वालोत्तप्तविलोलवर्त्तनयनज्योतिः शिखाप्रेक्षिणः।
वज्रक्रूरकठोरवीरनखरप्रान्तावगाढ़ार्पितः
शून्यायै बलयस्य पन्नगवधूवैधव्यदो दृश्यते॥ (ख) १८॥

[ततः प्रविशत्यात्मगतस्य पुरोभागतोऽग्निशरणो गरुडः।

गरुड। अत्मनः प्रहर्तारं भुजङ्गपतीन् अन्वेष्टुमनसा मयेदमग्न्यायतनं नयनाभ्यां दृष्टपूर्व्वम्। यदयं महाकालो न केवलं न दृश्यते। प्रष्टुमपि कोऽपि न दृश्यते। तथाहि

---

(१८) दुष्करं कटुकमिदं मम मन्दभाग्यायाः।

(क) साम्प्रतमस्माभिः कर्त्तव्यानां क्षणोत्तरमनुष्ठातव्यं।

(ख) कुर्व्वाण इति। वधिरादृक्षात् वर्षुः कर्त्तृकेण मरुतेन यद्रेः पर्वतस्य नद्याः द्रोणीरिव रन्ध्रादि कुर्व्वाणः, तस्य नद्रेयोः ज्वोतः शिखाप्रेक्षिणः अत्यर्थकोपात् प्रदीप्तं दृष्टातम् उन्मूलितश्च वनोत्तर कोतनावकाशो येन तथाभूतः, तथा मज्जतां वज्रकठोराणां घोराणां नखराणां प्रान्तैः अग्रैः आगाढ़ा अर्पितः दृष्टो येन तथाविधः यतो पन्नगानां नागानां रिपुः गरुत्मान् बलयस्य मण्डलाये दूरात् दृश्यते। शार्दूलविक्रीड़ितं वृत्तम्।

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यस्ति धैर्योदये-
मांसोत्कर्त्तनया रुजोऽपि वहतः प्रीत्या प्रसवं सुखम् ।
यावं यत्र विलुप्तमेकपुलकस्तत्र स्फुटो दृश्यते
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥ ८१ ॥

(म)

ततः कुतूहलमेव जनितनम्यानया धैर्यवृत्त्या (य)। भवतु न भक्षयाम्येवैनम्। पृच्छामि तावत् कोऽयमिति।

भादकः। शिरामुखैः स्यन्दत एव रक्त-
मद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि च ते महात्मन् !
किं भक्षणात्त्वं विरतो गरुत्मन् ! ॥ ८२ ॥ (र)

(म) ग्लानिरिति। अधिकं यथा तथा पीयमानं रुधिरं यस्य तादृशस्यापि अस्य ग्लानिः व्यथा नास्ति, मांसं तृ उत्कर्तनेन खण्डनेन जातमेव इति तथोक्तः रुजः पीडां अपि वहतः अस्य धैर्योदयैः धैर्यातिरेकैः सुखं प्रसवं विषादो दूरमास्तामिति भावः, यत्र यावं शरीरं न विलुप्तं विनष्टम् अपितु तत्र एकः केवलः पुलकः रोमहर्षः परमाणरजःपर्यन्तजनितस्फोटयादित भावः। स्फुटः स्पष्टः दृश्यते। अस्य दृष्टिः अपकारिणि आततायिनि अपि मयि उपकारिणीव निपतति। यादृच्छिकीडितं एतत्।

(य) धैर्यवृत्त्या धैर्यव्यवहारेण।

(र) शिरेति। शिराणां मुखैः रक्तं स्यन्दते खलु एव, अद्यापि अस्य देहे मांसम् अस्ति, हे महात्मन्! ते तव तृप्तिं परितोषम् न पश्यामि, हे गरुत्मन्! त्वं किं कथं भक्षणात् विरतः निवृत्तः?।

गरुडः । आत्मगतम् । आर्ये मार्ये ! कथमस्यामप्यवस्थायामेवमूर्जितमभिधत्ते (ल) । प्रकाशम् ।

आवर्जितं मया चक्षुा हृदयात्तव शोणितम् ।
अनेन धैर्येण पुनस्त्वयाहृतमिवाद्य मे ॥ ८३ ॥ (व)
तत् कस्त्वमिति श्रोतुमिच्छामि ।

मायकः । एवं क्षुधुपतप्तो (ग) न त्यागयोग्यस्त्वम् । कुरुष्व तावत् मम मांसशोणितेन तृप्तिम् ।

शङ्ख । सहसोपसृत्य । तार्क्ष्ये ! न खलु न खलु साहसमनुष्ठेयम् । नायं नागः । परित्यजैनं । मां भक्षय । अहं तवाहारार्थं प्रेषितोऽस्मि वासुकिना । इतो दर्शयति (घ) ।

मायकः । शङ्खचूडं दृष्ट्वा । कष्टं ! विफलीभूतो मे मनोरथः शङ्खचूडे नागच्छति ।

गरुडः । उभौ निरूप्य । इयोरपि भवतोर्वध्यचिह्नम् । कः खलु नागइति नावगच्छामि ।

शङ्ख । स्थान एव भ्रान्तिः ।

आस्तां स्वस्तिकलक्ष्म वक्षसि तनौ नालोक्यते कञ्चुकी
जिह्वे जल्पत एव मे न गणितं नाम त्वया हे अपि ।

(ल) ऊर्जितं तेजस्वलम् ।

(व) आवर्जितमिति । मया चक्षुा तव हृदयात् शोणितम् आवर्जितम् आहृतं पीतमित्यर्थः पुनः किन्तु त्वया अनेन धैर्येण एतदवस्थायामपि अनाश्यवस्तुनेति भावः । मे मम शोणितमिति शेषः आहृतमिव ।

(ग) क्षुधुपतप्तः क्षुधानिपीडितः ।

(घ) उरः वक्षःस्थलं दर्शयति दर्शयतीत्यर्थः ।

तिक्तस्तीव्रविषाग्निधूमपटलव्याविद्धरत्नस्त्रियो
नैता दुःखदशोकशोत्कृतमरुत्पोढाः कथाः पश्यसि ॥८४॥

(स)

गरुड़ः। उभौ निहत्य शङ्खचूड़स्य कथां दृष्ट्वा। तत्कः खलु मया व्यापादितः।

शङ्ख। विद्याधरवंशतिलको जीमूतवाहनः। कथमकारुणिकेन त्वया इदमनुष्ठितम्।

गरुड़। सगतम्। कथमनुष्ठितम्। अयं विद्याधरकुमारो जीमूतवाहनः?

मेरौ मन्दरकन्दरासु हिमवत्खानौ महेन्द्राचले
कैलासस्य शिलातलेषु मलयप्रागभारभागेष्वपि।
टिङ्कच्छेषु च तेषु तेषु बहुशो यस्य श्रुतं तन्मया
लोकालोकविचारिचारुचरितैरुद्गीयमानं यशः ॥८५॥ (ह)

(स) आस्तामिति। यद्यपि आस्तिक लक्ष्म आस्तिकं नाम नागविशेषः तदेव लक्ष्म लक्षणम् आस्तां तिष्ठतु, तनौ शरीरे अमेति शेषः कस्तुकः (खोचोष इति यस्य प्रसिद्धिः) न आलोक्यते न दृश्यते त्वयेति शेषः। किन्तु त्वया जल्पतः आत्मपत एव मे इमे शिखे अपि न गण्यते न मान्यते नाम, तथा तीव्रेण तीक्ष्णेन दारुणेनेत्यर्थः विषाग्नेः धूमपटलेन धूमनिचयेन व्याविद्धा मलिना रत्नानां स्त्रियः कान्तयः यासां तथोक्ताः दुःखदेन सोढुमशक्येन शोकेन यत् शोत्कृतं शोत्कारः तदेव मरुत् वायुः कम्पनकारित्वादिति भावः। तेन पोढा कम्पनरूपा व्यथा यासां ताहश्यीः तिस्रः एताः कथाः न पश्यसि?। आर्द्रज्वरिक्रोडितं दृश्यम्।

(ह) मेरावितिं। मया यस्य मेरौ सुमेरुनामके मन्दरस्य पर्वतस्य कन्दरासु गुहासु, हिमवतः हिमाचलस्य खानौ प्रस्थे, महेन्द्राचले,

सर्वथा महत्यंहः पङ्के (घ) निमग्नोऽसि।

नायकः। भोः फणिपते! किमेवमुद्विग्नोऽसि।

गरुड। किमस्थानमिदमावेगस्य (क)।

स्वशरीरमिदं दत्त्वा तार्क्ष्यात् परिरक्षितं यदीयमिदम्
युक्तं नेतुं भवतः पातालतलादपि तलं मम ॥८६॥ (ङ)

गरुडः। अये! करुणार्द्रचेतसा अनेन महात्मना अस्मद्ग्रासगोचरपतितस्यास्य फणिनः प्राणान् रक्षितुं स्वदेह आहारार्थमुपनीतः। तन्महदकृत्यमेतत्मया कृतम्। किं बहुना बोधिसत्व एवायं व्यापादितः। तस्य महतः पापस्य अग्निप्रवेशादृते नान्यत् प्रायश्चित्तं पश्यामि। तत् क्व नु खलु वह्निं समासादयामि (ग)।

कैलासस्य शिखरतलेषु, मलयस्य पर्वतस्य प्राग्भारभागेषु पूर्वविभागेषु तथा तेषु तेषु दिक्कक्षेषु दिगन्तकाननेषु बहुशः भ्रमन्तं पुनः पुनर्वा लोकालोके पर्वते विचरन्तीति तथोक्ता ये चारणगणाः वैतालिकगणाः तैः उच्चैर्गीत्यारम्भेण गीयमानं तत् प्रसिद्धं यशः श्रुतम्। भाट्टवर्णिकीकृतं दत्तम्।

(घ) अंहःपङ्के पापपङ्के।

(क) अस्थानम् अयोग्यस्थानम्। आवेगस्य वेगस्य।

(ङ) स्वशरीरमिति। स्वशरीरम् इदं दत्त्वा तार्क्ष्यात् गरुडात् यदीयं यस्य मम इदं शरीरं परिरक्षितं त्वयेति शेषः तं मां भवतः पातालतलात् अपि तलं नेतुं युक्तम्। इत्यन्वयः ते पातालं कथमहं सुखं दर्शयिष्यामि अतलस्पर्शादपि तले मम गमनं युक्तमिति निष्कर्षः।

(ग) बोधिसत्त्वः तदाख्यः करुणाधारः क्षत्रियकुमारः। समासादयामि प्राप्नोमि।

दिशः पश्यन्। अये! अमी केचित् गृहीतास्त्रय इत एवागच्छन्ति। तद् यावदेतान् प्रतिपालयामि।

शङ्ख। कुमार! पितरौ ते प्राप्तौ।

नायकः। सवस्त्रमम्। शङ्खचूड! समुपविश्योत्तरीयेण आच्छादितशरीरं कृत्वा धारय माम्। अन्यथा कदाचिदीदृशं सहसैव मां दृष्ट्वा अम्बा जीवितं जह्यात्।

शङ्ख। पार्श्वपतितमुत्तरीयं गृहीत्वा तथा करोति।

ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः।

जीमू। सखेद्म्। हा पुत्र जीमूतवाहन!

आत्मीयः परः इत्ययं खलु कृतः सत्त्वे कृपायां क्रमः
किं रत्न्या बहवः किमेक इति ते जाता न चिन्ता कथम्।
तार्क्ष्यात् त्रातुमहिं स्वजीवितपरित्यागं त्वया कुर्वता
येनाम्बा पितरौ बधूरिति हतं निःशेषमेतत् कुलम्॥ ८७॥

(घ)

दृष्ट्वा। सभयवीडमुत्थाय। आदे! विरम मुहूर्तम्।

(घ) आत्मीय इति। कृपायाम् अयम् आत्मीयः स्वजनः, अयं परः इत्ययं क्रमः नियमः विचार इत्यर्थः कृतः, सत्त्वे खलु सत्त्वमेव कृपाविषये आत्मपरविचारो नास्तीति तत्त्वमेवेत्यर्थः। किन्तु बहवः किं रत्न्याः रत्नसंख्याः? किमु एकः रत्न्याः इति ते तव कथं न चिन्ता जाता। येन त्वया तार्क्ष्यं पक्षिराजम् एकमिति शेषः त्रातुं रक्षितुं स्वशरीरपरित्यागं कुर्वता सता अम्बा पितरौ बधूरिति एतत् कुलं निःशेषं हतं नाशितम्। शार्दूलविक्रीडितं वृत्तम्।

अविरलनिपतद्भाष्पबालबिन्दूच्छं अहिहवीअदि (क) अग्गी (२०)।

सर्वे परिक्रामन्ति।

जीमू। हा पुत्त जीमूतवाहन!

गरुडः। श्रुत्वा। हा! जीमूतवाहनेति ब्रवीति। तद्व्यक्तमयमस्य पिता। तत् किमेतदौर्येणाग्निना आत्मानमुद्दीपयामि। न शक्नोमि अस्य पुत्रघातलज्जया मुखन्दर्शयितुम्। अथवा किमग्निहेतोः पर्य्याकुलोऽस्मि। तटस्थ (ख) एवास्मि अत्र निधेः। तद् यावदिदानीं।

ज्वालाभङ्गैस्त्रिलोकीग्रसनरसलसत्कालजिह्वापकल्पैः
सर्पाङ्गैः सम्प्रसक्तैः पदमिव कवलीकर्त्तुमीशैः समुद्रे।
स्वैरेवोत्पातवातप्रसरपटुतरैर्धुक्षिते पक्षवातैः
अस्मिन् कल्पावसानज्वलनभयकरे वाडवाग्नौ पतामि ८८ (ङ)

इत्युत्थातुमिच्छति।

---

(२०) जाते! विरम सङ्कल्पम्। अविरलनिपतद्भाष्पबिन्दुभिरभिभूयतेऽयमग्निः।

(क) अभिभूयते निर्वाप्यम् प्राप्यते।

(ख) तटस्थः तीरस्थः।

(ङ) ज्वालाभङ्गैरिति। त्रिलोकस्य त्रिभुवनस्य यत् ग्रसने यः रसः अनुरागः तेन लसत् स्फुरत् यत् कालस्य जिह्वाग्रं तत् कल्पैः तत्सदृशैः सर्पाङ्गैः सङ्करङ्गैः अतएव सम्प्रसक्तैः सूर्यस्य पदं स्थानं सूर्यलोकमित्यर्थः कवलीकर्तुं ग्रासीकर्तुं ईशैः समर्थैः ज्वालाभङ्गैः अर्चिनिचयैः उपलक्षिते इति शेषः उपलक्षणे हेतौवा। स्वैरेव उत्-

नायकः । भोः पक्षिराज ! अलमनेनाध्यवसायेन । नायं प्रतीकारोऽस्य (ज) पापस्य ।

गरुडः । जानुभ्यां स्थित्वा कृताञ्जलिः । भो महासत्त्व ! कस्तर्हि कथ्यताम् ।

नायकः । प्रतिपालय क्षणमेकम् । पितरौ मे प्राप्तौ । यावदेतौ प्रणमामि ।

गरुडः । एवं क्रियताम् ।

जीमू । इदानीं सदृशम् । देवि ! दिष्ट्या वर्धसे । अयं बलवान् जीमूतवाहनो न केवलं म्रियते । प्रत्युत कृताञ्जलिना गरुडेन म्रियमेणेव पर्युपास्यमानस्तिष्ठति (झ) ।

इदा । महाराज ! कथमस्मि । अकृतशरीरस्य मुहं पेक्खिस्सं (२१) ।

मल ; अहं अज्जउत्तं पेक्खिअ अदिपिअस्सि करिअ ण पत्तिआमि (अ) । (२२)

---

(२१) महाराज ! कृतार्थास्मि । अकृतशरीरस्य सखे प्रेक्षिष्ये ।

(२२) कथमार्यपुत्रं प्रेक्ष्य अतिप्रियमिति कृत्वा न प्रत्येमि ।

पाते प्रलये यः वातस्य प्रसरः प्रस्फुरणं तद्वत् पटुतराः प्रचण्डा इत्यर्थः तैः पक्षयोर्वातैः सञ्जाते धूमिते सन्दीपिते कल्पावसाने प्रलये यः ज्वलनः अग्निः तद्वत् भयङ्करे भयजनके अग्निवत् वाडवाग्नौ पतामि । गन्धराजसम् ।

(ज) प्रतीकारः प्रायश्चित्तम् ।

(झ) म्रियते जीवति । पर्युपास्यमानः सेव्यमानः ।

(ञ) प्रत्येमि विश्वसिमि ।

ओम्। उपस्थित। वत्स! एहीहि। परिष्वजस्व माम्।

नायकः। उत्थातुमिच्छन् पतितोत्तरीयो मूर्च्छति।

यक्ष। कुमार! समाश्वसिहि समाश्वसिहि।

ओम्। हा वत्स! कथं मां दृष्ट्वा परिष्वङ्गं (ट) गतोऽसि।

दृष्ट्वा। हा पुत्तक! कहं बाप्पामेत्तेणेव वि तुए ण सम्भाविदम्हि (२३)।

मम। हा आर्यपुत्र! कहं गुरुजणो वि दे ण पेक्खिदव्वो (२४)। सर्वे मोहं नाटयन्ति।

यक्ष। हा! यक्षचूडहतक! कथं गर्भस्थ एव न विपद्योऽसि। येनैवं सत्ये सत्ये मरणातिगं दुःखमनुभवसि।

नरदत्तः। सर्वमिदं मम नृशंसस्य असमीक्ष्यकारितायाः विजृम्भितम् (ठ)। तदेवं तावत् करोमि। पद्माभ्यां वीजयन्। ओ महाजन! समाश्वसिहि समाश्वसिहि।

नायकः। समाश्वस्य। यक्षचूड! समाश्वासय गुरून्।

यक्ष। तात! समाश्वसिहि समाश्वसिहि। अम्ब! समाश्वसिहि समाश्वसिहि। उभौ समाश्वसितः।

---

(२३) हा पुत्तक! कथं बाष्पमात्रेणापि त्वया न सम्भावितास्मि।

(२४) हा आर्यपुत्र! कथं गुरुजनोऽपि ते न प्रेक्षितव्यः।

(ट) परिष्वङ्गम् आलिङ्गनम्।

(ठ) असमीक्ष्यकारितायाः अविचारकारितायाः। विजृम्भितं विलासः कार्यं निष्पर्यः।

इडा। पुत्त! कहं पेक्खन्ताणं एव्व अम्हाणं कदन्त-हदएण अवहरीअसि। (२५)

जीमू। देवि! मैवममङ्गल्यवादिनी भव। म्रियत एवायुष्मान्। तद्धृ: समाश्वास्यताम्।

इडा। सुअं वच्छेणाहत्थ रुदती। पडिहदममङ्गलम्। ण रोदिस्सम। मलअवदि! समस्सस। वच्छे! उट्ठेहि उट्ठेहि। वरं एत्तिअवेलं तुमं भत्तुणो मुहं पेक्ख। (२६)

मल। समाश्वस्य।। हा अज्जउत्त! (२७)

इडा। मलयवत्या मुखं पिधाय। वच्छे! मा एव्वं करेहि। पडिहदं कदु एदं (२८)।

जीमू। स्वगतम्।

विलुप्तशेषाङ्गतया प्रयातान्
निराश्रयत्वादिव कण्ठदेशम्।
प्राणांस्त्वदङ्गं तनयं निरीक्ष्य
कथं न तापात् शतधा प्रयामि॥ ६८॥ (ङ)

---

(२५) कथं प्रेक्षमाणानामेवाकाले कृतान्तहृदयेनापहियसे।

(२६) प्रतिहतममङ्गलम्। न रोदिष्यामि। मलयवति! समाश्वसिहि वरमेतस्यां वेलायां त्वं भर्तुर्मुखं प्रेक्षस्व।

(२७) हा आर्यपुत्र!

(२८) वत्से! मैवं कृथाः। प्रतिहतं खल्वेतत्।

(ङ) विलुप्तेति। विलुप्तशेषाणि विनष्टशेषाणि अङ्गानि अवयवा यस्य तत्तया हेतुना निराश्रयत्वात् निरवलम्बनत्वादिव कण्ठदेशं प्रयातान् गतान् प्राणान् त्वदङ्गं तनयं पुत्रं निरीक्ष्य तापात् व्यथाति-

चेट। हा अज्जउत्त! अदिदुक्करकारिणी खु अहं। जा ईदिसं अज्जउत्तं पेक्खन्ती अज्जावि जीविदं ण परिच्चआमि (२८)।

इहा। णाअअस्साकण्णि अ मन्ती णरइहिअ। किसंस (ठ) कहं दाणीं तए एदं णाअअमाअओव्वसोहं तं एअ एदावत्थं पुत्तवअस्स मे सरीरं कअं (३०)।

नायकः। अम्ब! मा मैवं। किमनेन कृतम्। ननु पूर्व्वमप्येतदीदृशमेव (ड) परमार्थतः। यस्य

मेदोऽस्थिमांसमज्जास्रुक्कृतेऽस्थिस्त्वचावृते।
शरीरे वास्ति वा शोभा सदा बीभत्सदर्शने॥ १००॥ (त)

---

(२८) हा आर्य्यपुत्र! अतिदुष्करकारिणी खल्वहम्। या ईदृशम् आर्य्यपुत्रं प्रेक्षमाणा कदापि जीवितं न परित्यजामि।

(३०) कथंस! कथमिदानीं त्वया एतदीदृशमायौवनशोभं तरोरेतावदवस्थं पुत्रवयस्य मे शरीरं कृतम्।

रेकात् कथं यतथा न प्रयामि न विद्रोष्यै इत्यर्थः। उपजातिरत्नम्।

(ठ) कथंस! निर्दय!

(ड) एतत् शरीरमिति शेषः परमार्थतः तत्त्वतः ईदृशम् एतदवस्थमेव।

(त) मेद इति। मेदसां वसानाम् अस्थ्नां कङ्कालानां मांसानां मज्जानाम् अस्रुजां रुधिराणाञ्च कृते समष्टिरूपे त्वचा चर्मणा आवृते आच्छादिते सदा बीभत्सं घृणितं दर्शनं यस्य तादृशे अस्मिन् शरीरे का वा शोभा अस्ति? नैव काऽपि शोभेत्यर्थः। तत् कथमेनमधिक्षिपसि जनयीति भावः।

गरुड़ः। भो महाप्राज्ञ! नरकानलज्वालावलीढमिवात्मानं मन्यमानो दुःखं तिष्ठामि। तदुपदिश्यतां येन मुच्येऽमुष्मादेनसः। (घ)

नायकः। अनुजानातु मां तातः। यावदस्य पापस्य प्रतिपक्षमुपदिशामि। (ङ)

जीमू। वत्स! एवं क्रियताम्।

नायकः। वैनतेय! श्रूयताम्।

गरुड़ः। कृताञ्जलिः। आज्ञापय।

नायकः।

नित्यं प्राणाभिघातात् प्रति विरम कुरु प्राक्तनस्यानुतापं
यत्नात् पुण्यप्रवाहं समुपचिनु दिशन् सर्वसत्त्वेष्वभीतिम्।
मग्नं येनाच नैनः फलति परियतं प्राणिहिंसासमुत्थं
येनेतद्वारिपूरे लवणकणमिव क्षिप्रमस्तङ्गतस्य ॥१०१॥ (च)

(घ) गरुड़ेति। नरकानलस्य ज्वालाभिः शिखाभिः आवलीढं दग्धमिव। एनसः पापात्।

(ङ) प्रतिपक्षं प्रतिकर्तुं प्रायश्चित्तमिति यावत्।

(च) नित्यमिति। नित्यं सततं प्राणाभिघातात् परप्राणहरणात् प्रति विरमं निवर्तस्व, प्राक् पूर्वस्मिन् काले कृतस्य प्राणिहिंसनरूपस्य पापस्य अनुतापं कुरु, कथमेतत्कृता कृतमिति सन्तापम् अनुभव, सर्वेषु सत्त्वेषु जीवेषु अभीतिम् अभयं दिशन् ददत् यत्नात् पुण्यप्रवाहं पुण्यसन्ततिं समुपचिनु अनुतिष्ठ, येन येन उक्तरूपेण कर्मणा इति भावः। यत् यस्मात् प्राणिहिंसासमुत्थं जीवहिंसाजन्यं परियतं कर्तुमशक्यमित्यर्थः एतत् एनः पापं क्षुद्रस्य अल्पस्य वारिपूरे जलप्रवाहे क्षिप्रं लवणकणमिव मग्नं विलीनं विनष्टमिति यावत् न फलति न फलं निरयादिकम् उत्पादयतीत्यर्थः। अक्षराष्टकम्। उपमालङ्कारः।

गरुड़ः । यदाज्ञापयसि ।

पद्मानन्निद्रायितो भवता प्रतिबोधितः ।

सर्वप्राणिवधादेष विरतोऽद्यप्रभृत्यहम् ॥ १०२ ॥ (ग)

सम्प्रति हि

क्वचिद् द्वीपाकारैः पुलिनविपुलैर्भोगनिवहैः

कृतावर्त्तभ्रान्तिर्वलयितशरीरः क्वचिदपि ।

व्रजन् कूलात् कूलं क्वचिदपि च सेतुप्रतिसमः ।

समाज्ञो नागानां विचरतु महोदन्वति सुखम् ॥१०३॥ (घ)

अपिच,

स्नानापादलम्बान् घनतिमिरनिभान् केयपाषान् वहद्भ्यः

सिन्धूरेभ्यो दिग्भ्यः प्रथमरविकरस्पर्शताम्रैः कपोलैः ।

(ग) अद्मानेति । अद्मानमेव निद्रा तया यायितः सुप्तः अचेतन इति यावत् एषः कृष्णे भवता प्रतिबोधितः जागरितः सन् अद्यप्रभृति सर्वेषां प्राणिनां वधात् विरतः निवृत्त इत्यर्थः ।

(घ) क्वचिदिति । नागानां समाज्ञः गणः क्वचित् द्वीपाकारैः सर्वतो जलवेष्टितो भूभागः द्वीपमुच्यते तदाकारैः, पुलिनं सैकतं तोयोत्थितं तत् पुलिनं सैकतं सिकतामयमित्यमरः, तद्वत् विपुलाः पृथुलाः ये भोगनिवहैः शरीरसमूहैः भोगसुखेभ्यः शरीरेभ्यश्च फणकाययोरित्यमरः । उपलक्षितः क्वचित् वलयितं भक्षणोद्यतं शरीरं येन तथोक्तः अतएव कृता क्षणिता आवर्त्तस्य जलभ्रमस्य खाताकारो-ऽम्भसां भ्रम इत्यमरः, भ्रान्तिः भ्रमः येन तथाभूतः क्वचित् अपि कूलात् कूलं व्रजन् गच्छन् अतएव सेतुप्रतिमः सेतुनिभः सन् महो-दन्वति महासमुद्रे सुखं निर्भयमिति यावत् यथा यथा विचरतु सञ्चरतु । शिखरिणीवृत्तं रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति तल्लक्षणात् ।

आयासेनालसाङ्गोऽप्यवगणितरुजः कानने चन्दनानाम्
अस्मिन् गायन्तु रागादुरगयुवतयः कीर्त्तिमेतां तवैव ॥१०४॥

(फ)

नायकः। साधु महासत्त्व! साधु! अनुमोदामहे। सर्वथा दृढसमाधानो (ब) भव। भक्षयूड़ निर्हिंस। भक्षयूड़! त्वयापि खगृहमिदानीं गम्यताम्।

यङ्ग। निश्चल अधोमुखस्तिष्ठति।

नायकः। निश्चलं मातरं पश्यन्।

उत्प्रेक्षमाणा त्वां तार्क्ष्यचञ्चु कोटिनिपातितम्।
त्वद्दुःखदुःखिता नूनमास्ते सा जननी तव ॥ १०५ ॥ (भ)

(फ) अस्मादिति। उरगाणां नागानां युवतयः पत्न्यः अस्मात् खलितात् अतएव आयासेनाल्पात् चरणपर्य्यन्तमपतितादित्यर्थः घनतिमिरनिभात् सान्द्रान्धकारप्रतिकात् कोमलागात्, वर्णोत्तर्कोयानित्यर्थः वहन्त्यः दधाना इत्यर्थः प्रथमेन नवोदितेन रविकरेण सूर्य्यकिरणेन यः अर्घः तेन ताम्राः रक्ताः तैः अतएव सिन्दूरेणेव दिग्धैः लिप्तैः कपोलैः उपलक्षिता इत्यर्थः आयासेन श्रमेण विस्मरजनितेनेति भावः कलसानि व्याप्तानि अङ्गानि यासां तथोक्ताः अपि अवगणिता अविचिन्तिताः रुचः प्रीतिः श्रमजनिता इति भावः याभिः तथाभूताः सत्यः यस्मिन् चन्दनानां कानने रागात् अनुरागात् तवैव एवमवस्थस्य अन्यव्यवच्छेदकत्वात् न अमेति भावः एतां कीर्त्तिं गानेन अभयदानजनितामिति शेषः गायन्तु कीर्त्तयन्तु। खगधराधमम्।

(ब) अनुमोदामहे अनुमन्यामहे। दृढं समाधानं निश्चयो यस्य तादृशः सत्यप्रतिज्ञ इत्यर्थः।

(भ) उत्प्रेक्षमाणेति। सा तव जननी त्वां तार्क्ष्येण गरुडेन चञ्चुकोट्यां चञ्चुभ्यां निपातितम् उत्प्रेक्षमाणा सम्भावयन्ती अतएव नूनं

इहा। साधम्। धन्या खलु सा जननी या गरुडमुखपतितस्याशतभरीरस्यैव पुत्रकस्य मुखं प्रेक्षिष्यति(३१)।

यङ्क। अम्ब! सत्यमेवैतत्। यदि कुमारः खल्वो भविष्यति।

मागधकः। वेटनां नाटयन्। अङ्क! परार्थसम्पादनरसाचेष्टितावती वेला मया न लक्षिता:। सम्प्रति तु मां बाधितुमारब्धा मर्मच्छेदिन्यो वेदना:। मरणावस्थां नाटयति (म)

जीमू। ससम्भ्रमम्। हा वत्स! किमेवं करोषि।

इहा। हा! किं णु खलु एव्वं वददि। सोरसाडम्। परित्तायह परित्तायह। एसो खलु मे पुत्तओ विवज्जइ। (य) (३२)

---

(३१) धन्या खलु सा जननी या गरुडमुखपतितस्याशतभरीरस्यैव पुत्रकस्य मुखं प्रेक्षिष्यते।

(३२) हा! किं नु खल्वेवं वदति। परित्रायध्वं परित्रायध्वम्। एष खलु मे पुत्रको विपद्यते।

निश्चितं तव दुःखेन शोकेन दुःखिता आर्ता आस्ते तिष्ठति, अथवा नून मन्ये इत्युत्प्रेक्षा। अतः सत्वरं त्वया माता आश्वासनीयेति भावः।

(म) नाटयन् अभिनयन्। परार्थेति परार्थस्य परकार्यस्य मागप्राणरक्षणरूपस्य इति भावः सम्पादने यो रसः अनुरागः तस्य आवेशात् अतिरेकात्। लक्षिताः गणिताः वेदना इत्यनेनान्वयः। वेलामिति अत्यर्थे द्वितीया। नाटयति अभिनयति।

(य) सोरसाडं वक्षःस्थलं ताडयित्वा। विपद्यते म्रियते।

(र) समानय संयोजय।

नव। हा अज्जउत्त! परिच्चइदुकामो विअ लक्खीअसि। (२२)

नायकः। अङ्गानि वर्तुमिच्छन्। अङ्गचूड! समानय (ट) मे हस्तौ।

अङ्ग। तथा कुर्वन्। कष्टमनाथीकृतं (ठ) जगत्।

नायकः। अर्द्धोन्मीलितचक्षुः पितरं पश्यन्। तात! अम्ब! अयं मे पश्चिमः प्रणामः।

गात्राण्यमूनि न वहन्ति सचेतनत्वं
श्रोत्रं स्फुटाक्षरपदां न गिरं शृणोति।
कष्टं निमीलित मिदं सहसैव चक्षुः
हा तात! यान्ति विषयास्त्व ममासवोऽमी ॥१०६॥ (ड)

अथवा। संरक्षता पन्नगम्। दष्ट्वादि पतित्वा पतति।

दष्ट्वा। हा पुत्त! हा वच्छ! हा गुरुअणवच्छल! कहिंसि। देहि मे पडिवअणं (३४)।

---

(२२) हा आर्यपुत्र! परित्यक्तुकाम इव लक्ष्यसे।

(३४) हा पुत्र! हा वत्स! हा गुरुजनवत्सल कासि। देहि मे प्रतिवचनम्।

(ट) तथा कुर्वन् करौ संयोजयन्। अनाथीकृतं नाथशून्यं कृतं जगदिति शेषः। पश्चिमः शेषः।

(ड) गात्राणीति। अमूनि गात्राणि शरीराणि सचेतनत्वं चैतन्यसहितत्वं न वहन्ति अवयवानि भवन्तीत्यर्थः। श्रोत्रं श्रवणेन्द्रियं स्फुटानि सुव्यक्तानि अपि अक्षरपदानि वर्णा यस्यां तादृशीमपीति शेषः। गिरं वाचं न शृणोति। कष्टम् इदं चक्षुः सहसैव निमीलितम्। हा तात!

जीमू। हा वत्स! जीमूतवाहन! हा प्रथमविज्ञानवल्लभ! हा सर्वगुणनिधे! आशिं देहि मे प्रतिवचनम्। हतहतहृदय। कष्टं भोः कष्टम्।

निराधारं धैर्यं कमिव शरणं यातु विनयः
क्षमः शान्तिं वोढुं क इह विरता दानपरता।
कृतं सत्यं सत्यं व्रजतु च कृपा काय कृपया
जगज्जातं शून्यं त्वयि तनय! लोकान्तरगते॥१०७॥ (ग)

मल। हा पल्लउत्त! कहं परिच्चइअ गदोसि अदिणिग्घिणे मलअवदि! किं तए पेक्खिदव्वं? जा एत्तिअं वेलं जीविआसि (२५)।

गरुड। हा कुमार! क्षेमं प्राणेभ्योऽपि वल्लभं जनं परित्यज्य गम्यते। तदवश्यमन्वेति त्वां गरुडचूडः।

---

(२५) हा आर्यपुत्र! कथं परित्यज्य गतोऽसि। अतिनिर्घृणे मलयवति! किं त्वया प्रेक्षितव्यम्? या एतावद्वेलं जीविताशि।

विनयश्च मम स्वामी क्षमाः प्राणा यान्ति निर्गच्छन्ति। यत्सन्तिष्ठते दुःखम्।

(ग) निराधारमिति। हे तनय! त्वयि लोकान्तरगते सति धैर्यं निराधारं निराश्रयं न कोऽपीदानीं धैर्यमाश्रयतीति भावः विनयः कमिव शरणं रक्षितारं शरणं स्मरश्चित्तोरित्यमरः यातु गच्छतु न कमपीत्यर्थः। इह जगति शान्तिं क्षमां वोढुम् आश्रयितुं कः क्षमः शक्तः? न कोऽपीत्यर्थः दानपरता वदान्यता विरता रहिता, सत्यं सत्यं निश्चितं कृतं विनष्टम्, अद्य कृपया दीना कृपा इयं क्व कुत्र व्रजतु गच्छतु? किं बहुना अद्य जगत् शून्यं जातम्। सर्वगुणशालिनस्तव विरहादिति भावः। विप्रलम्भोद्वेगः।

गरुड़ः। कष्टमुपरतोऽयं (ध) महात्मा। तत् किमिदानीं करोमि।

इडा। सास्रमूर्ध्वमवलोक्य। भगवन्तौ लोकपालौ! कष्टम्भि अमिदेव सेच्चिध पुत्तअं मे जीआवेहि (३६)।

गरुड़ः। सदर्षमाकाशतम्। अये! अमृतसञ्जीवनात् साधु स्मृतम्। मन्ये प्रनष्टमयम्। तद् यावत् त्रिदशपतिमभ्यर्थ्य तद्दिष्टेनामृतवर्षेण न केवलं जीमूतवाहनमेतानपि पूर्वभक्षितानस्थिशेषानुरगपतीन् प्रत्युज्जीवयामि। यदि न ददात्यसौ (स) तदाहम्।

पक्षैः पोत्वाम्बुनाथं पटुतरजवनैः प्रेर्यमाणः समीरैः
नेत्राग्निक्ष्वेडमूर्च्छाविधुरविनिपतत्सानलहादयाकः।
चक्षुः सक्षुण्ण यक्षामनिधनदगदाप्रेतलोकैयदण्डान्
आजौ निर्जित्य देवान् क्षणमसृतमयं वर्षमभ्युत्सृजामि॥१०॥

(इ)

---

(३६) भगवन्तौ लोकपालाः। कथमप्यमृतेन जीवितां पुत्रकं मे जीवय।

(ध) उपरतः मृतः।

(स) त्रिदशपतिं देवराजम्। अभ्यर्थ्य याचित्वा, तद्दिष्टेन तदुक्तेन। असौ देवराजः।

(इ) पक्षैरिति। पटुतराः समर्थतराः अतएव जवना वेगवन्तः तैः समीरैः पवनसदृशैरित्यर्थः। पक्षैः प्रेर्यमाणः उड्डीयमान इत्यर्थः अम्बुनाथं वसुधं पीत्वा नेत्राग्निना यः क्ष्वेडः टाङ्कः तेन या मूर्च्छा मोहः तया विधुरा विह्वलाः अतः निपतन्तः ज्वालाः साग्निकाः

तदयं गतोऽस्मि। इति साटोपं (ख) परिक्रम्य निष्क्रान्तः।

जीमू। वत्स शङ्खचूड। किमद्यापि स्थीयते। समाहृत्य दारूणि पुत्रस्य मे विरचय चिताम्। येन वयमप्यनेन सहैव गच्छामः।

शङ्खा। पुत्त शङ्खचूड। लहुं सज्जेहि। दुक्खं अम्हेहिं विणा भाउणो ते चिट्ठदि (३७)।

शङ्ख। मातः। यदाज्ञापयन्ति गुरवः। नन्वयमेवाहं युष्माकम्। इत्युक्त्वा चितारचनां रूपयति। तात! अम्ब! सज्जीकृतेयं चिता।

जीमू। देवि! किमपरं रूप्यते। तदुत्तिष्ठ चितायामारोहामः। सर्वे उत्तिष्ठन्ति।

मल। वद्धाञ्जलिरूहं पण्यत्ती। भयवदि गोरि! तुए भणिदं। जहा विज्जाहरचक्कवट्टी भत्ता ते भविस्सदित्ति। ता कहं मम मन्दभग्गाए कदे तुमं अलिअवअणा संवुत्ता। (३८)

---

(३७) पुत्र शङ्खचूड! लघु सज्जय। दुःखमस्माभिर्विना भ्राता ते तिष्ठति।

(३८) भगवति गौरि! त्वया भणितम्। विद्याधरचक्रवर्ती भर्ता

दारुण चर्काः सूर्याः यस्य तथाभूतः चक्रो यक्षस्य रत्नस्य अधिपः, धनदस्य कुबेरस्य सखा, प्रेतलोकानामीशस्य यमस्य दण्डः तान् सङ्ख्ये युद्धे देवान् निर्जित्य पराभूय क्षत्रम् अक्षतमयं वर्म अभ्युत्सृजामि करोमीत्यर्थः। खड्गराजम्।

(ख) साटोपं ससम्भ्रमं सावेगं वा।

ततः प्रविशति सखीसहिता गौरी ।

गौरी । महाराज ! जीमूतकेतो ! न खलु साहसमनुष्ठातव्यम् ।

जीमू । अये ! कथममोघदर्शना गौरी ।

गौरी । अवलम्बस्व हिण्डिम् । वत्से ! कथमहमशोकवादिनी भवेयम् । नागवल्लीपल्लव कमलकुड्मलेनाभ्युक्ष ।

निजेन जीवितेनापि जगतामुपकारिणः ।
परितुष्टाक्षि ते वत्स ! जीव जीमूतवाहन ! ।।१०९। (क)

नागः । उत्तिष्ठति ।

जीमू । कष्टम् । देवि ! दिष्ट्या वर्धसे । प्रत्युज्जीवितो वत्सः ।

इहा । भगवदीए पसादेण । (३९)

नागः । गौरी इहा वयस्याभिः । अये ! कथममोघदर्शना भगवती ? ।

अभिलषिताक्षिवरदे प्रणिपतितजनार्तिहारिणि ! शरण्ये !
शरणं नमाम्यहं ते विद्याधरवन्दिते ! गौरि ! ।।११०।(ख)

ते भविष्यतीति । तत् कथं मम मन्दभाग्यायाः ते त्वमोघदर्शना भवेत्या ।

(३९) भगवत्याः प्रसादेन ।

(क) निजेनेति । हे वत्स ! जीमूतवाहन ! निजेन जीवितेन जगताम् उपकारिणः ते तव परितुष्टाक्षि प्रीतासि ।

(ख) अभीति । अभिलषितं वाञ्छितम् अक्षि यस्यां सा वरं ददातीति

इति गौर्याः पादयोः पतति। सर्वे अहं पश्यन्ति।

जीमू। मये! कथमनभ्रा वृष्टिः। भगवति! किमेतत्।

गौरी। राजन् जीमूतकेतो। जीमूतवाहनं प्रत्युज्जीवयितुं मेतांश्चाग्निशेषानुरगपतीन् समुपजातपश्चात्तापेन पक्षिपतिना देवलोकादियममृतवृष्टिः पातिता। अङ्गुल्या निर्दिश्य। किं न पश्यति भवान्।

सम्भ्राम्याः शङ्खचूडं स्फुटमणिकिरणैर्भासुरैरुत्तमाङ्गैः
जिह्वाकोटिद्वयेन क्षितिमसृतरसास्वादलोभाल्लिहन्तः।
सम्भ्रान्त्यावहवेगा मलयगिरिसरिद्वारिपूरा इवैते
वक्रैः प्रस्थानमार्गैर्विषधरपतयस्तोयराशिं विशन्ति॥ १११॥

(ग)

नायकसहिता। वत्स जीमूतवाहन! न त्वं जीवितदानमात्रस्यैव योग्यः। तदयमपरस्ते प्रसादः।

तत् सम्बोधने तथा प्रक्षिपतिनां अनानाम् आर्ति हारिणि! क्लेशनाशिनि! शरण्ये शरणागतरक्षिति! विद्याधरैः वन्दिते! हे गौरि! अहं ते तव चरणौ नमामि। आक्षिप्तम्।

(ग) सम्भ्राम्या इति। शङ्खचूड सम्भ्राम्याः सकृताः शङ्खचूडेन शिखिना इत्यर्थः स्फुटा उज्ज्वलाः मणीनां फणस्थितानामिति शेषः किरणाः प्रभाः येषां तादृशैः उत्तमाङ्गैः शिरोभिः फणैरिति यावत् उपलक्षिताः अन्तरस्य अन्तरीयात् दृष्टत्वेति भावः आस्वादलोभात् जिह्वाकोटिद्वयेन जिह्वाहितभागेनेत्यर्थः क्षितिं पृथिवीं लिहन्तः आस्वादयन्तः मलयगिरेः सरितां नदीनां वारिपूरा इव जलप्रवाहा इव सम्भ्रान्त्या आवहवेगाः वेगवन्तः एते विषधरपतयः भुजगेन्द्राः वक्रैः कुटिलैः प्रस्थानमार्गैः गतिभिरित्यर्थः तोयराशिं समुद्रं विशन्ति। अन्वयोक्तम्।

हंसांसाहृतहेमपङ्कजरजः सम्यक्पदुद्योतिते-
रत्यन्तैर्मम मानसादुपनतैस्तोयैर्महापावनैः ।
स्वेच्छानिर्मितरत्नकुम्भनिहितैरभिषिच्य स्वयं
त्वां विद्याधरचक्रवर्त्तिनमहं प्रीत्या करोमि क्षणात् ॥११२॥

(घ)

अपिच

अग्रे सरीभवतु काञ्चनचक्ररत्न-
मेत्र द्विपस्तव धवलैरयनैश्चतुर्भिः ।
श्यामो हरिर्मलयवत्यपि चेत्यमूनि
रत्नानि मे समवलोकय चक्रवर्त्तिन् ! ॥११३॥ (ङ)

अपिच । आलोक्यन्तामिमे प्रारब्धयाचनानिर्मलयाचन्य-
जन हस्ता मणिमरीचिरचितेन्द्रचापभङ्ग्यो भक्तिनमित-

(घ) हंसेति । एषा सुगमत्वेति भावः । अहं स्वयं प्रीत्या परि-तोषेण हेतुना क्षणात् क्षणमात्रेण मम मानसात् उत्सवैः हंसानाम् कै: स्वच्छभावैः आहृतानां कल्पितानां हेमपङ्कजानां काञ्चनकम-लानां रजोभिः परागैः सम्यक् एव प्रकृत्या न तावत् वैकृतैः कृत्रि-मैरिति यावत् महापावनैः अतिपवित्रैः स्वेच्छया निर्मितेषु रत्न-कुम्भेषु निहितैः स्थापितैः उपनतैः उपस्थितैः तोयैः जलैः त्वाम् अभिषिच्य विद्याधराणां चक्रवर्त्तिनम् अधीश्वरं करोमि । आर्दू-विक्रीडितं वृत्तम् ।

(ङ) अग्रेसरीभवत्विति । हे चक्रवर्त्तिन् ! काञ्चनानां चक्र-राशिरेव रत्नम् अग्रेसरीभवतु तवाग्रे गच्छतु । धवलैः शुभ्रैः चतुर्भिः दन्तैः उपलक्षितः चतुर्दन्त इत्यर्थः एष द्विपः ऐरावत इत्यर्थः श्यामः कृष्णवर्णः हरिर्नीलाश्वः मलयवती च इति अमूनि मे मम रत्नानि समवलोकय पश्य । वसन्ततिलकं वृत्तम् ।

पूर्वार्धकायाः (च) प्रथमस्ति त्रयस्ति च मतङ्गजकुम्भदार्यो विद्याधरपतयः। तदुच्यतां किं ते भूयः प्रियमुपकरोमि।

नायकः। अतः परमपि प्रियमस्ति।

त्रातोऽयं शक्रचूडः पतगपतिभयाद्वैनतेयो विनीतः
तेन प्राग्भक्षिता ये विषधरपतयो जीवितास्तेऽपि सर्वे।
मत्प्राणाया च मुक्ता न गुरुभिरसवश्चक्रवर्त्तित्वमाप्तं
साक्षात् त्वं देवि दृष्टा प्रियमपरमतः किं पुनः प्रार्थ्यसे यत्

॥११४॥ (छ)

तथापीदमस्तु भरतवाक्यम।

दृष्टिं हृष्टग्रिखण्डिताण्डवकृते मुञ्चन्तु काले घनाः
कुर्वन्तु प्रतिरूढसन्ततहरितेगेस्योत्तरीयां क्षितिम्।

(च) त्रातोऽयमित्यस्यार्थः। शारदेति शारदः शरत्कालीनः यः शशाङ्कः तद्वत् निर्मलं बालव्यजनं चलत् येषां तथाभूताः, मणीनां रत्नानां स्वस्वगात्रपरिष्कृतानामिति भावः मरीचिभिः किरणैः रचिताः निर्मिता इन्द्रचापस्य शक्रधनुष इव भङ्गयः रचना: यैः तथाभूताः तथा भक्त्या नमितः पूर्वार्द्धकायः यैः तथाविधाः।

(छ) त्रातेति। अयं शक्रचूडः पतगपतेः पक्षिराजस्य भयात् त्रातः रक्षितः वैनतेयः गरुडः विनीतः विनयं गतः। तेन वैनतेयेन प्राक् पूर्वं ये विषधरपतयः नागेन्द्राः भक्षिताः ते सर्वेऽपि जीविताः, मम प्राक्प्राया जीवनलाभेन गुरुभिः पित्रादिभिः असवः प्राणा न मुक्ताः न त्यक्ताः, चक्रवर्त्तित्वं विद्याधरसाम्राज्यम् आप्तं प्राप्तं मयेति शेषः किं बहुना हे देवि! त्वं साक्षात् दृष्टा साक्षात् कृता, अतःपरं प्रियं किं पुनः, यत् प्रार्थ्यसे त्वमिति शेषः नातःपरमपि प्रियमस्तीति न किमपि प्रार्थये इत्यर्थः। खण्डराद्वृत्तम्।

चिन्वानाः सुकृतानि वीतविपदो निर्मत्सरैर्मानवैः
मोदन्तां सततञ्च बान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥११५॥
(अ)

इति विद्याधराः हर्षं ।

इति पञ्चमोऽङ्कः ।

समाप्तश्चेदं नागानन्दं नाम नाटकम् ।

(अ) इतिशिवेति । यथा मेघाः कृष्णानां शिखण्डिनां मयूराणां तालुपल्लवे नर्तनार्थं काले वृष्टिं सृजन्तु वर्षन्तु इत्यर्थः । प्रतिदर्षं सस्यानां सम्पत्तये अविच्छिन्नं यत् हरितं शस्यं धान्यादि तदेव उत्तरीयं गात्रावरणवस्त्रवत् यस्यास्तथाभूतां क्षितिं पृथिवीं कुर्वन्तु च । तथा प्रजाः वीता विगता विपद् यासां तथाभूताः निर्मत्सरैः अन्यशुभदर्शनेनेर्ष्यारहितैरित्यर्थः मत्सरोऽन्यशुभदर्शनेऽसूया इत्यमरः । मानवैः सुकृतकर्मसु सदनुष्ठानेषु चिन्वानाः कुर्वन्तः तथा बान्धवानां भ्रातृपितृव्यादीनां सुहृदां मित्राणाञ्च गोष्ठीषु समाजेषु प्रमोदन्तां इति तथाविधाः सन्तं सततं मोदन्तां सुखीभवन्तु च । यादृङ्नाविष्कोक्तितं इत्यमम् ।

इति पञ्चमोऽङ्कः ।

इति वि, ए, उपाधिधारिणा श्रीशीवानन्दविद्या[illegible]सरभट्टाचार्येण विरचिता नागानन्दनाटकव्याख्या समाप्ता ।